"इम्येन्युअल काण्ट् " महोदयः मानवात्मानं अथवा "स्वम्" सर्व ेष्ठं मनुते अन्यादर्शवादिवत् एषोऽपि "स्वं " मनोयुक्तमङ्गीकरोति, न तु भौतिकम् एतन्मतेन मनः दिक्कालयोः ष्टा अस्ति , एतेन उपर्युक्तवग करणस्य धारकमस्ति , अतः मनुष्यस्य आत्मा सर्व ेष्ठोऽस्ति सः कथयति - "व्य क्त परिणतिरिति अवग छेत् न तु कस्यचि क्ष्यस्य साधनमात्रम् परन्तु अस्य नायमाशयः यत् व्यक्तेः महत्त्वमङ्गीकृत्य समाजस्य अवहेलनं करोति अन्यच्च सः व्यक्तेः कर्तव्यस्य विशिष्टं महत्त्वमङ्गीकरोति, यतो हि कर्तव्यं विवेकाधारितं वर्तते सः कथयति-(The Laws of conduct prescribed by reason are moral imperatives. They are unqualified demand and which are good in themselves.)

काण्ट्-सनातननैतिकनियमानां सिद्धान्ताः-

१) मनुष्यः तत्सूत्रानुरूपकार्यचरणं कुर्यात् येन सः सर्वव्यापिनियामान् कर्तुमि छेत्

२) व्यक्तिः केवलम् आत्मानमेव लक्ष्यी -कुर्यात् न तु किमपि परिणतिसाधनम्

३) व्यक्तेः व्यवहारः तत् समूहसदस्यानुरूपः भवेत् यस्मिन् शासकशास्यगुणद्वयं व्यक्तौ तिष्ठति

स्वतन्त्रतायाः विषये काण्टसिद्धान्ताः -

(१) स्वतन्त्रताप्रा त्यै आत्मसंयमः आवश्यकः

(२) अन्येषां सहयोगेन सोद्देश्यानां पूर्त्यै इदमावश्यकं यत् स्वयमन्येषाम् उचितोद्देश्यानां मान्यतां दद्यात्

(३) केचन शाश्वतनियमाः वर्तन्ते कोऽपि नैतिकदृष्ट्या तादृशं कर्मकतु न श नोति, यत् सार्वत्रिकमान्यता प्रा कर्म नास्ति उदाहरणार्थम् - हततम्
४) स्वतन्त्रतायाः आधारः तर्कबुद्धिः अनुभवनैर्भर्य विनापि तर्कबुद्ध्या नैतिकनियमान् परिपालयितुं श नोति

हेगल् द्वन्द्वसिद्धान्तः-

हेगल् मतेन अस्माकं ज्ञानं अस्तित्वस्य तत्सम्बन्धस्य च समरूपं (Identical) अस्ति अस्माकमज्ञानम् अस्तित्वस्य तर्कबुद्धिपरकमस्ति, स्वयमस्तित्वञ्च तर्कबुद्धिपूर्णा व्यवस्था वर्तते अस्तित्वस्य एतत् र्कबुद्धिपरकव्यवस्थायाः कारणं मनुष्यस्य ज्ञानसत्ता तावत्पर्यन्ता वर्तते यावत् पर्यन्तमस्माकं ज्ञानास्ति त्वयोः तादात्म्यं भवेत् हेगल् महोदयः व्याख्याति यत् विश्वं निरन्तरं विकासमेति, तस्मात् तस्य मानवज्ञानस्य च तादात्म्यं सम्पादयितुं मनुष्यः द्रतगत्या ज्ञानं वर्धयेत अस्माकं ज्ञानं विखण्डितम् अपूर्णञ्चास्ति परन्तु यथा यथा अस्माकं ज्ञानं वर्धते तथा तथा ज्ञानस्य अपूर्णत्वं विरोधाभासश्च क्षीयते सर्वान्ते अस्तित्वज्ञानयोः तादात्म्यं वर्धते

हेगल्-महोदयः विश्वं निर्बाधगत्या सक्रियविकासाभिमुखं प्रवर्तत इति अभिप्रैति एतत् क्रमविकासस्य प्रक्रियया विश्वं स्वतः स्वान्तर्निहित-उद्देश्याभिमुखं वर्धते एतत् क्रमविकासस्य प्रयोजनन्तु स्वतः स्वान्तर्निहितलक्ष्यस्य भा यस्य च विषये जागरूकता सम्पादनम् प्रकृतेः नियमाः अपि विचारास्सन्ति, परन्तु ते अचेतनस्तरे उत्पद्यन्ते परमतत्त्वम् आत्मचेतनत्वात् त क्ष्यं मनुष्यस्य मनसि उत्प ाः भवितुनर्हन्ति

हेगल्-महोदयः क्रमविकासस्य विचारम् एवं विश्लेषयति यत् अस्तित्वं परमतत्वस्य मनसि विचारं विकासयति सर्वविधक्रमविकासस्य सारः पूर्णज्ञानाभिमुखं गमनमस्ति सवषु कथनेषु वैरुद्धयं दृश्यते, तद्वैरूद्ध्यस्य सिद्धान्तः विकासस्य मूलमस्ति प्रत्येकमपि विषयः विपरीतत्वे पर्यवसति अयं विकासः निरन्तरं तावत्पर्यन्तं प्रचलति यावत् सर्वेषां विरोधात्मकानां समाहारः कस्मिंश्चित् बृहत्तरसत्ये न जायेत ब्र ाण्ड-चेतना (परमेश्वरः) श्वाश्वतसत्यरूपेण तिसृषु स्थितिषु विकसिता भवति यथा स्थापना, (Thesis)प्रतिष्ठापना, (Anti thesis) संस्थापना (Synthesis) चेति हेगल् एनां प्रक्रियां पूर्णताभिमुख प्रक्रियेति व्याख्याति

नैतिकता सिद्धान्तः –

उपर्युक्तद्वन्द्वात्मकचिन्तनशैल नैतिकताक्षेत्रेऽपि हेगल्-महोदयः प्रयु क्ते असौ रा यवैयक्तिक-सनातन-अधिकारयोः साम जस्यं प्रस्तौति एकत्र पूर्णाधिकारः विधि(LAW)रूपेण अभिव्यक्तो भवति, यं वयं स्थापना इति कथयितुं श नुमः व्यक्तेः अन्तरात्मा एतस्य विरोधं करोति, तं विरोधं प्रतिष्ठापनं वक्तुं प्रभवामः सामाजिकनैतिकता एतयोर्द्वयोर्मध्ये साम जस्यं स्थापयति, अतः सामूहिक नैतिकता या सामाजिकसंस्थासु परिलक्षिता भवति वैयक्तिकनैतिकतायाः उचितमार्गदर्शनं करोति हेगल् शिक्षाक्षेत्रेऽपि सिद्धान्तस्यास्य प्रयोगं करोति

स्थापनाः– बालकः प्राकृतिकबन्धनम् आि त्य शिक्षामारभते स च स्व सहजप्रवृत्तीनाम् इन्द्रियाणाञ्च वशीभूतोऽस्ति

प्रतिष्ठापना :–आत्मा स्वातन्यमि छति, स च आत्मा केवलम् आत्मनः पूर्णत्वं जानाति स्वीकरोति च

संस्थापना :–आत्मसंयमेन बालकः प्राकृतिकबन्धनस्वतन्त्रतयोर्मध्ये साम जस्यं स्थापयति क्रमशः वैयक्तिकानुभवः अपूर्णः असंतोषदः चेति अनुभू त प्रा नोति परन्तु समाजः रा यश्च व्यापकपूर्णत्वं प्रस्तौति क्रमेण सः स्वहितस्य सामाजिकहितेन सह तादात्म्यं द्रष्टुमारभते, तदा व्यक्तेः पूर्णतत्वस्य साक्षात्कारो जायते शिक्षायाः एषैव स्थितिः, या संस्थापनेति कथ्यते

आधुनिक –आदर्शवादः

यूरोपमहादेशे जर्मनीदेशे यः आदर्शवादः आरब्धोऽभवत् हेगल्-महोदयेन सह तस्य समाि ः अभवत् मा र्स-महोदयः हेगल् द्वन्द्वसिद्धान्तम् आत्मसात् कृतवान्, परन्तु तत्त्वमीमांसायां भौतिकवादं स्वीकृतवान् अनेन प्रकारेण आदर्शवादधारा अवरूद्धाऽभवत् इंगलैण्ड् ,स्काटलड्, इटली तथा संयुक्तरा य आमेरीकादेशेषु आदर्शवादि विचारधारा नव्यं रूपमगृ णा ब्रिटेन् देशे सेम्युअल टायलर कालरिज, जेम्स हचिसन स्टलिग, जान के अर्ड ,बर्नार्ड बोसांके, ब्रेडले, नन् प्रभृतयः प्रसिद्ध-आदर्शवादिनः अभवन् इटलीदेशे आदर्शवादिशिक्षां प्रभावितवत्सु प्रसिद्धदार्शनिकेषु जेन्टाइल प्रमुखोऽस्ति अमेरिकादेशे हेरिस् तथा हार्न इति द्वौ दार्शनिकौ विख्यातौ शिक्षादर्शनस्य विवेचने एतेषां वक्तव्यानि तत्र तत्र वर्ण्यन्ते

आदर्शवादाधारितशिक्षा -

उपर्युक्तविवेचनेन आदर्शवादः मनुष्यं केवलं प्राकृतिकोपादानमिति अनङ्गीकृत्य सृष्टेः सवात्कृष्टकृतिरिरिति निरूपयति आदर्शवादी प्राकृतिक - वातावरणापेक्षा सांस्कृतिक- वातावरणं महत्त्वपूर्णमिति अङ्गीकरा`ति, यतः तत् मनुष्यस्य सोपलब्धिरस्ति स्व सांस्कृतिकनि ध तं कृत्वा व्यक्तिः तं - वर्धयितुं क्षमते अनया दृष्ट्या शिक्षायाः महत्त्वपूर्ण-भूमिका अस्ति प्रकृतिवादः बालकं प्राकृतिकवातावरणेन अ यनुकूलनं कर्तुम् आग्रहं करोति , परन्तु इदानीमिदं प्रमाणितमस्ति यत् तद्-अ यनुकूलनं द्विविधमस्ति वातावरणमपि मनुष्यप्रकृतेः अनुकूलनमावश्यकमस्ति मनुष्यपश्वोः प्राकृतिकवातावरणेऽपि अन्तरमस्ति पशुः स्ववातावरणं यथावत् स्वाभाविकरूपेण स्वीकरोति, परन्तु अनन्तकालात् मनुष्यः प्राकृतिकवातावरणं सानुरूपं निर्माति आर् .आर् रस्क लिखति - " यदि वयं मानवीय वातावरणं प्राकृतिकरूपेण (अथवा भौतिकरूपेण मनः सामाजिकरूपेण) (Psycho-social) अथवा सांस्कृतिकरूपेण च विभागं कुर्याम चेत् प्रथमविभागं भौतिकप्रविधि यां ,द्वितीयविभागं भौतिकंसौन्दर्यात्मक -नैतिक धार्मिकरूपेण पुनर्विभक्तं कुर्याम चेत् अस्माभिः निष्कषाऽयं स्वीकर्तव्योऽस्ति यत् व्यापकशिक्षा प्रणाल्याम् एतेषाम् अङ्गानां परिपूर्णविकासाथ बालकः स द्धीकर्तव्योऽस्ति या कापि शिक्षाप्रणाली उक्तेषु एकम यङ्गम् उपेक्ष्यते सा अवश्यमेव अपूर्णा भवति [२]

प्राकृतिकवातावरणेन सह मनुष्यस्य अ यनुकूलनं विनाऽपि शिक्षा भवितुमर्हति , परन्तु सांस्कृतिकवातावरणं ग्रहीतव्यमेव प्रक्रियामेनां समाजशास्त्रे संस्कृतिसंक्रमणं (Acculturation) अथवा सामाजिकीकरणम् (Socialization)इति कथयन्ति भारतीयपरम्परायाम् एषा प्रक्रिया संस्कारनिर्माणमिति कथ्यते कार्यमिदं शिक्षां विना असम्भवमस्ति , अतः आदर्शवादे मनुष्यं मनुष्यं कतु शिक्षा न केवलम् उपयोगाय भवति, अपि तु अनिवार्या भवति

आदर्शवादिशिक्षार्थः

अनेके आदर्शवादि - दार्शनिकास्तु स्वाभिमतं पक्षमेकं प्रकटीकृत्य पृथक् पृथक् परिभाषाः प्रस्तुन्वन्ति "मनुष्यस्य जन्मजातशक्तीनां प्राकृतिक सर्वाङ्गीणप्रगतिशीलो विकासः शिक्षा वर्तते " कथनमेतत् एडिसन् महोदयः एवं

प्रकारेण व्यनक्ति- "शिक्षा यदा कस्यापि मनुष्यस्य मस्तिष्कं प्रभावयति तदा तस्मिन् निहितान् सर्वविधसु गुणान् पूर्णाताश्च बहिरानयति " उपर्युक्तपरिभाषयोः विद्यालयीय शिक्षायाः स्वरूपम् अभिव्यक्तं न भवति आदर्शवादानुसारेण यदि शिक्षा बालकं संस्कारिणं कुरुते चेत् , सा कथं करोति कीदृशान् संस्कारान् प्रददाति तान् कः प्रभावयति इत्यादि प्रश्नाः अनुत्तरिताः तिष्ठन्ति एतान् प्रश्नान् परिहतु बट्लर्-महोदयेन प्रस्तुता परिभाषा इत्थं वर्तते- "शिक्षा एतादृशी क्रिया अथवा अध्यवसायोऽस्ति , येन मानवसमाजस्य अधिकपरिप सदस्याः न्यूनपरिप सदस्येषु अधिकपरिप तामानेतुं, तेषां मानवजीवने परिष्कृतयोगदानं कतु कृतप्रयासः वर्तते [३] उक्तपरिभाषाणां विश्लेषणेन आदर्शवादिशिक्षायाः निम्नोक्तानि तथ्यानि अवलोकितानि भवन्ति

१) शिक्षां प्रदातुम् अर्जयितुश्च सक्रियप्रयासः काम्यते विना प्रयत्नं शिक्षा नोत्पद्यते

२) शिक्षां प्रा ुम् अनिवार्यरूपेण शिक्षकस्य आवश्यकता अस्ति शिक्षायाः उद्देश्यानि पूर्वनिर्धारितानि भवन्ति

३) शिक्षया न केवलं व्यक्तेर्विकासो जायते, अपि तु मानवसमाजः उ तिं प्रा नोति शिक्षा मानवं परिप करोति अर्थात् संस्कारवन्तं करोति

शिक्षायाः लक्ष्यम् -

पूर्वमेव इदं स्पष्टीकृतमस्ति यत् आदर्शवादानुसारं मनुष्यस्य व्याख्या भौतिकाधारेण कतु न श यते, न वा अन्यजीवधारिभिः सह तस्य सम्बन्धं स्थापयितुं श यते मनुष्यस्तु मनुष्य एव, यतः तस्मिन् आत्मा निवसति मनुष्यस्य आत्मिक्प्रकृतिः उपरिष्टात् योजितं किमपि तत्त्वं नास्ति, अपि तु तस्य जीवनस्य सारभूतं तत्त्वमस्ति इत्थम् आदर्शवादे मानवव्यक्तित्वं सवात्कृष्टा ईश्वरीया कृतिर्मन्यते, अतः जीवनस्य सवाच्चं लक्ष्यं व्यक्तित्वस्य उच्चतमविकासः अथवा स्वानुभूतिः (Self Realization) भवति अस्यायमाशयः "व्यक्तित्वे निहितशक्तीनां पूणा विकासः " प्रकृतेः परं काचित् सत्तास्ति तथा तत् चेतनसत्तायाः अनुरूपं किमपि अस्ति चेत् मनुष्य एव विश्वे व्या स्य विकासेन भवति आदर्शवादानुसारं मानवजीवनलक्ष्यं स्वीय वास्तविकस्वरूपस्य अवलोकनम् अनुभूतिश्च

प्रकृतिकवादि-दार्शनिकोऽपि एतत् समानार्थकं पदम् आत्माभिव्यक्तिम् (Self experession)अथवा स्वाभिव्यक्तिम् प्रयु क्ते,परन्तु मनुष्ये तु चैतन्यशक्तिरस्ति, यस्याः साहा येन सः सांस्कृतिकवातावरणस्य सृ ष्ट करोति, आत्मानुभूत्यथ सांस्कृतिकवातावरणस्य सृ ष्ट करोति, आत्मसात्करणञ्च आवश्यकम् आत्मानुभूतेः चत्वारि प्रमुखसोपानानि वर्तन्ते, तानि आरु बालकः शनैः शनैः आत्मानुभू त करोति निम्नस्तरे शारीरिकं जैविकञ्च स्व-स्वरूपं भवति शारीरिक जैविकविकासः आत्मानुभूतेः प्रथमं सोपानं, प्रकृतिवादिभिः तत् आत्माभिव्यक्तिरिति कथ्यते शारीरिकस्य स्वस्य उपरि सामाजिकं स्वं वर्तते एतत् अस्माकं सामाजिकसम्बन्धेषु अभिव्यक्तं भवति सामाजिकनियमानां स्वीकृतिः, सामाजिकहिताय वैयक्तिकस्य त्यागः इत्यादि लक्षणं स्वस्य (आत्मनः) अनुभूतेः सामाजिकस्तरान्तर्गतं भवति प्रयोजनवादिनः स्तरस्यास्य अनुभूति उद्देश्यपर्यन्तं सीमां कुर्वन्ति तृतीयस्तरे बौद्धिकी स्वानुभूतिः भवति, यत्र सामाजिकस्य स्वीकृतेः अस्वीकृतेश्च कारणं व्यक्तर्व्यवहारनियन्त्रणं नास्ति, अपि तु तकण विवेकबुद्ध्या च स्वस्य अनुभू त करोति सः सामाजिक नैतिकताम् अतिक्रम्य सदसदोः तोः `यसः प्रेयसश्च तर्कबुद्धिजनितं भेदं कतु शनोति तस्य आचरणं चिन्तनं विश्वासश्च विवेकपूर्णाः जायन्ते

चतुर्थसोपानन्तु स्वस्य आध्यात्मिकं भवति, यस्मिन् केवलं तर्कपरक बौद्धिकशान्तिरेव न प्रा यते, अपि तु सम्पूर्ण व्यक्तित्वस्य रूपान्तरणं संजायते गुणाः स्वाभाविकाः भवन्ति, न ते शारीरिकसुखाय भवन्ति, न वा सामाजिकस्वीकृत्यै न वा बौद्धिकतृ त्यै भवन्ति, अपि तु जीवनस्य सहजाङ्गरूपाः जायन्ते अस्यामवस्थायां व्यक्तेः विश्वासेन सह तादात्म्यं जायते विश्वात्मा (Universalself) अवर्णनीयः स पि त्रिधा वर्णितो जायते तत् सत्यं,शिवं, सुन्दरं च वर्तते आदर्शवादानुसारम् आत्मानुभूतेः चरमावस्थायां व्यक्तेः सत्यं,शिवं,सुन्दरम् इत्येषाम् अनुभूतिर्जायेत सत्यं,शिवं,सुन्दरम् इति पदानि डा पाण्डेयः इत्थं व्याख्याति - सत्यं न परिवर्तते, न प्रकाशते, न प्रकटितं भवति, अपूण भौतिकजगति विद्यमानं नास्ति, न सापेक्षम् अस्ति तत् निरपेक्षं, चरमम् ,अविनाशि, प्रत्ययात्मकं ,सम्पूर्णविश्वाधारञ्च वर्तते त रपेक्षसत्यस्य ज्ञानावा : शिक्षायाः उद्देश्यं भवेत् यत् सत्यं तदेव शिवं भवेत्

भौतिकजगतः वस्तुषु कल्याणावलोकनं भ्रमोऽस्ति शिवत्वं तु परमशिवे वर्तते तत् परमशिवस्य अनुभूतिः करणीया एवमेव सुन्दरस्य विषयेऽपि निर्णयः संसारविशेषपदाथषु विद्यमानसुन्दरता व्यक्तिगतसुखं जनयति किन्तु पदाथाऽयं स्वल्पकालं यावत् सुन्दरोऽस्ति, सुन्दरपदार्थः नष्टो भवेत्, किन्तु सौन्दय नष्टं भवितुमर्हति किम् सौन्दर्यस्य उपासना करणीया न तु सुन्दरस्य सौन्दय हि चरमसत्यम्,तदेव परमं शिवम् तदेव च अस्माकम् उपासनीयो विषयः [४]

विश्वात्मनः वर्णनं लक्षणदृष्ट्या विचार्यते चेत् त्रिषु रूपेषु कतु.श यते, परन्तु तानि त्रीणि भि भि सत्ताःन वर्तन्ते एतेषु अन्तर्निहित एकत्वमस्ति यत् सत्यं तत् शिवं तदेव सुन्दरं चास्ति तथैव यत् यि छिवं तत् • सत्यं, तदेव सुन्दरञ्च यत् सुन्दरं तत् सत्यं त छिवञ्चास्ति अपरिप ापस्थायाम् एतानि पृथक् दृश्यन्ते, एतेषु प्रत्येकं विकासाय पाठ्यक्रमे क्रमशः - ज्ञानात्मकः, क्रियात्मकः भावनात्मकश्च विषयाः कल यन्ते, परन्तु अन्ते एतानि व्यक्तित्वघटने एकाकाराणि जायन्ते , तदेव आत्मानुभूति -स्थितिरिति कथ्यते

शिक्षायाः इदमेकं प्रमुखमुद्देश्यं ध्येय(Objectivess) रूपेण प्रस्तूयते चेत् तत् संख्या विवर्धते तत् प्रा व्यरूपेण प्रस्तुतीकतु श यते

बोगोस्लोस्की अनुसारं शिक्षायाः ध्येयस्य प्रकारद्वयं भवति ज्ञानसन्दभ .सम्पूर्णदृष्टिकोणस्य रूपान्तरणं तथा आत्मसन्दभ उच्चजीवनस्योपलब्धिः सः लिखति - "अस्माकम् उद्देश्यं छात्रेषु एतद् यो यतोत्पादनमस्ति यत् ते सम्प जीवनं यपितुं श नुयुः सर्वाङ्गपूर्णव्यक्तित्वस्य निर्माणं कतु श नुयुः, सुखिजीवनस्य उ ासोपभोगं कुर्युः , यदि समस्याः आग छेयुः उत्कृष्टजीवनं जीवितुम् अन्ये यः साहा यं च कतु श नुयुः "[५]

हार्न-महोदयः स्पेन्सर्वत् ध्येयानाम् उत्क्रमं प्रस्तौति यस्मिन् आत्मानुभूतेः उत्तरोत्तरसोपानानि परिभाषितानि भवन्ति-

प्रथमसोपानम् –

शारीरिकस्वास्थ्यम् ,उत्क्रमे तस्य निम्नतमं स्थानमस्ति, किन्तु अग्रिमसोपानानाम् आधारभूतं मन्यते

द्वितीयसोपानम् –

आर्थिकस्वतन्त्रता अस्मिन् सोपाने ताः कुशलताः सम्मिलिताः वर्तन्ते याः स्वस्य परिवारस्य च भरणपोषणार्थम् आवश्यकाः याश्च कुशलताः वैयक्तिकचरित्रेण सामाजिकन्यायेन च सम्बद्धाः वर्तन्ते तासां माध्यमेन विश्वे सर्जनश त्या सह मनुष्यस्य सहानुभूतिसाम जस्यं च स्थापितं भवति

तृतीय सोपानम्–ज्ञानम् –

अस्या आशयस्तु विश्वसंरचनायां साकारभूतविचराणां चिन्तनम् अर्थात् सृष्टिमेनां ज्ञातुम् अस्याः सृष्टेः तथ्यात्मकं तर्कपरकं ज्ञानं तृतीयसोपाने भवति

चतुर्थ सोपानम् –सौन्दर्यस्य प्रोत्साहनम् –

अत्र कलात्मककृतीनां सर्जजनं प्रशंसा च आग छति एतन्माध्यमेन अनन्तपूर्णत्वस्य प्रकटनं जायते

पञ्चम सोपानम् – चरित्रनिर्माणम् –

अस्या आशयस्तु व्यक्तेः नैतिकाचरणस्य, सामाजिकन्यायस्य च विकासः एतन्माध्यमेन सनातनसत्यस्य विषये मनुष्यस्य द्धा समेधते

षष्ठसोपानम् – उपासना –

एतदुद्देश्यं सवापरि अस्ति अस्याशयः मनुष्यस्य विश्वात्मना सह चेतनसम्बन्धस्थापनम् [६]

उपर्युक्ताः सव ध्येयाः परस्परं सम्बन्धिताः वर्तन्ते शरीरं मनश्च मनसः विभि ाः क्रियाः सर्वाः एकस्मिन् अंशे ग्रथिताः सन्ति "आदर्शः एषोऽस्ति यत् समन्वितविश्वरूपे समन्वितसमाजे समन्वितव्यक्तेः निरन्तरो विकासः " इदान यावद् व्यक्तिसमाजौ समन्वितौ न स्तः , यतोहि तौ अपूर्णस्य,सामयिक पूर्णस्य चिरन्तनस्य च अभिव्यक्तिम् अपूर्णरूपेणैव दातुमर्हन्ति [७]

उपर्युक्त-विवेचनेन स्पष्टं भवति यत् स्पेन्सर्-मूल्योत्क्रमः आदर्शवादे कथञ्चित् समाविष्टो जायत एव चतुर्थसोपानात् षष्ठसोपानं यावत् विद्यमान-मूल्यानि प्रकृतिवादि शिक्षायाम् उपेक्षितानि वर्तन्ते, किन्तु आदर्शवादि, शिक्षायां तान्येव महत्वपूर्णमूल्यानीति परिगण्यन्ते प्रकृतिवादी "स्वं" भौतिकजैविकस्तरे पश्यति, किन्तु आदर्शवादे "स्वं" तु सांस्कृतिकम् आध्यात्मिकश्चेति सवात्कृष्टं स्थानं प्रा नोति

सामाजिकमुद्देश्यम् :-

यद्यपि उपर्युक्तविवेचनैः आदर्शवादी सामाजिकपक्षं नोपेक्षते इति स्पष्टं भवति आदर्शवादिदृष्ट्या वैयक्तिकविकासे "सामाजिकहितम्" अन्तर्हितं भवति प्रायः आदर्शवादिनामुपरि अयमारोपोऽस्ति यत् ते अति वैयक्तिकतायाः उद्देश्यं स्वीकुर्वन्ति, तथा सामाजिकपक्षम् उपेक्षन्ते आत्मानुभूत्युद्देश्यम् उच्चवर्गस्य उद्देश्यमस्ति, यत्र सामाजिकशोषणस्य आधारेण कासाञ्चित् व्यक्तीताम् विकासो निहितोऽस्ति,परन्तु उपर्युक्तविवेचनेन स्पष्टं भवति यत् आत्मानुभूत्युद्देश्ये व्यक्तेः स्वार्थपरता नास्ति, अपि च समष्टिहिते तद्धितं समाहितमस्ति

केचन आदर्शवादिदार्शनिकाः आपत्तिमेनां वारयितुं सामाजिकोद्देश्यं पृथ ्निरूपयन्ति

हा कग् -उद्देश्यद्वयं विवृणोति प्रथमं सम्प्रेषणम् , (Communication)द्वितीयन्तु विकासार्थमवसरः सम्प्रेषणस्य आशयः बालके यः त ज्ञान संस्कृत्योः प्रदानं यत् मानवजात्या परम्परया सञ्चितमस्ति एतत् प्रत्येकं वर्गस्य कर्तव्यमस्ति यत् स्व अग्रिमवर्गस्य कृते सञ्चितज्ञानराशेः हस्तान्तरीकरणम् युववर्गस्य प्रगत्यै पैतृकसम्पद्रपेण तानि ज्ञानानि प्रा तानि भवन्ति प्रत्येकस्मिन् काले मानवजातिः अग्रिमपरम्परां ज्ञानेन संस्कृत्या च वर्धयति एतद् वर्धनं विकासो वा उचितवातावरणस्य निर्माणं वा सामाजिकोद्देश्यस्य द्वितीयपक्षः हा कग् कथयति -(We may at least conduct our youth of the farthest point in our own horizon....."For each man," We may say to them, there is a region of consciousness, more nearly just and free than others, looking out toward absolute truth.")[8]

हार्न वैयक्तिक सामाजिकोद्देश्ययोर्मध्ये संश्लेषणं कृत्वा लिखति - ङ्व्यक्तेः सम्बन्धितशैक्षिकोद्देश्येषु संस्कृतज्ञान विकासानां समावेशो भवेत्, समाजदृष्ट्या कुशलताचरित्रनागरिकतानामन्तर्भावः स्यात् यतः वैयक्तिकोद्देश्यमपि गौणरूपेण सामाजिकमस्ति, तथा सामाजिकोद्देश्यमपि गौणरूपेण वैयक्तिकमस्ति

आदर्शवादे छात्रस्वरूपम्(Pupil concept)

आदर्शवादानुसारं छात्रः शरीरेन्द्रियमस्तिष्कैः संजातः अङ्गी नास्ति स: आत्मा अथवा मनः वर्तते तस्य शरीरमपि अस्ति, परन्तु वास्तविकरूपेण शरीरस्य सीमामु ्ध्य तिष्ठति सः अपूर्णोऽस्ति,परन्तु पूर्णताभिमुखं निरन्तरम् अग्रे सरति आदर्शवादः क्रमविकासस्य तत्सिद्धन्तं नाङ्गीकरोति यत् मानवशिशुः अन्यप्राणि यः विकसितरूपोऽस्ति, यस्मिन् मस्तिष्कस्य आविर्भावात् बौद्धिकशक्तेरुत्पत्तिर्जातास्ति, अतः सः स्ववातावरणं नियन्त्रयितुं श नोति , किन्तु पशुः वातावरणं विवशतापूर्वकं स्वीकरोति आदर्शवादी मनः मस्तिष्कस्य पर्यायत्वेन नाङ्गीकरोति सः तत् मनुष्ये निहिते श्वरीयांशत्वेन मनुते अनुभवस्य केन्द्रं मस्तिष्कं नास्ति, अपि तु मनः वर्तते संक्षेपेण आदर्शवादानुसारं बालकः मनः अथवा आत्मा

उक्तसंप्रत्ययस्य सम्बन्धः कक्ष्याध्यापनापेक्षया अधिकोऽस्ति कक्ष्यायां पठनशीलः छात्रः आत्मरहितं शारीरिकं वस्तु नास्ति तस्य दृश्यशरीरान्तः सूक्ष्मदृष्ट्या अवलोकनेन आत्मनः विद्यमानत्वं दृश्यते बालकस्य व्यक्तित्वं शरीराधारितं नास्ति, अपि तु आत्माधारितं वर्तते अस्य नायमाशयः यत् आदर्शवादः शरीरस्य अवहेलनं करोति

प्रो. हार्न- अनुसारम् :-"(Consciousness, as we know it in our present mode of existence, manifests itself only as the correlate of a nervous system..... It is also the basis for any conception of the fundamental place of the body in any general plan of education)"[९]

आदर्शवादः छात्रस्य सामाजिकपक्षस्य उपेक्षां न करोति हार्न अग्रे कथयति- " मनुष्यः पूणा वर्तते, तथैव व्यापकसमग्रस्य अंशोऽपि वर्तते व्यक्तेः प्रकृतिरियमस्ति यत् सः स्वार्थाय समाजाय चास्ति वैयक्तिकता संकीर्णताभिः परिवृतो नास्ति अपि तु स्वमित्रैः सह जीवनं कतु बृहत्परिधौ वर्तते "[१०] पुनश्च सः कथयति - "विद्याथ तादृशः परिमितः जनः वर्तते , यः शिक्षितो भूत्वा अनन्तपुरुषरूपेण विकसितो जायते तस्य वास्तविकोद्भवः देवत्वमस्ति ; तस्य प्रकृतिः स्वतन्त्रा वर्तते, तद् भा यम् अमरत्वश्चास्ति [११] बोगोस्लोब्स्की छात्रव्यक्तित्वं विलक्षणम् (Unique) इति निरूपयति व्यक्तित्वस्य पूर्णविकासाय धारणात्रयम् आवश्यकमिति व्याख्याति

प्रथमधारणा :-आत्मचेतनायाः सम्बन्धिताऽस्ति यत् व्यक्तित्वं कस्याश्चित् मनोदशायाः अपेक्षया अधिकं विशालं व्यापकश्चास्ति

द्वितीय धारणा :-व्यक्तित्वे पूर्णत्वमस्ति

तृतीयधारणा :-व्यक्तित्वं विलक्षणमस्ति

बोगोस्लोब्स्की महोदयस्य विश्वासोऽस्ति यत् :-" वातावरणं व्यक्तित्वं प्रभावयति, व्यक्तिश्च स्ववातावरणस्य निर्धारणं करोति आत्मानं यानि उद्दीपनानि प्रभावयन्ति, व्यक्तित्वं तानि गृ ाति, तेषां चयनं करोति, इत्थं सः स्ववातावरणं स्वयं सृजति निर्धारयति च सामाजिकपक्षेषु व्यक्तित्व कल्पित वातावरणस्य प्रामुख्यं भवति "[१२]

शिक्षार्थिनः नैतिकी स्थितिः -

छात्रस्वरू ाविषयकः प्रश्नोऽयमुदेति यत् बालकः जन्मना दुष्टो वा यो यो वा आदर्शवादिबालके आत्मनः अस्तित्वं स्वीकृत्यापि रूसोवत् भावावेशीः न भवति यत् बालकः प्रकृत्या यो यो भवतीति आदर्शवादिबालके आत्मनः अस्तित्वमात्रमङ्गीकरोति परन्तु नैतिकस्थितिसम्बद्धान् प्रश्नान् उपेक्षितुं सः न श नोति

तत्सम्मुखे लिष्टाः इमे प्रश्नाः जाग्रति यथा बालकेषु काः शक्तय प्र छ ाः काश्च वास्तविकशक्तयः छात्रनिगू ाः शक्तयः कथं बहिः निस्सार्यन्ते

हार्न कथयति - ङ्बालकः जन्मना न यो यः न वा दुष्टः यद्यपि आत्मनः प्रकृतिः शुभः तथा तस्मिन् पापस्यास्तित्वम् आदर्शवादी स्वीकरोति बालके विकासस्य अनन्तशक्तयः विद्यमानाः सन्ति, परन्तु ताः शुभाय अशुभाय वा प्रवतरन् बालकस्य सद्गुणदुर्गुणौ स्वसंकल्पशक्तेः वातावरणजनित - प्रभावस्य चोपरिनिर्भरौ वतते वातावरणे तात्कालिकं सुखदं तत्त्वमस्ति येन बालकः तदुपरि आकृष्टो भवति अतः अशुभप्रवृत्तिः सुलभतया जायते, परन्तु शुभप्रवृत्यथ दृ संकल्पस्य आवश्यकता अस्ति मेण विनापि पापप्रवृत्तिर्भवति यतो हि तस्मिन् इन्द्रियजन्य सुखं निहितमस्ति, किन्तु सद्गुणोत्पत्यै शिक्षा, मार्गदर्शनम् , अनुशासनम्, स्वक्रिया, स्वतः प्रयासश्च आवश्यकः बालके जन्मना एव अन्तःकरणशक्तिः विद्यमानास्ति,

शिक्षया अन्तःकरणशक्तिर्विकसिता भवति, बालके स्वतन्त्रसंकल्पशक्तेः अस्तित्वस्य प्रमाणमिदमस्ति यत् सः क कर्तुमि छति, क निर्मातुमि छति तदथ सः स्वतन्त्रोऽस्ति तद्भा यं पूर्वनिर्धारितं नास्ति बालकं सतः शुभस्य च विषये प्रेरयति

आदर्शवादी वास्तविकरूपेण कुकर्म, दुर्गुणः, अत्याचारः इत्यादीनां विषये अवश्यं दृ ष्ट ददाति, परन्तु शिक्षायाः कार्यम् असद्वृत्तिनिवारणपूर्वकं शिक्षार्थिनः सत् प्रवृत्यै प्रेरणम् तथैव हार्न लिखति- विद्यार्थिस्वरूपविषये कथिर तथ्यदृष्ट्या इत्थं भ्रमो न कार्यः यत् छात्रः प्रायः अज्ञानी, दुष्टः, अनवधानः, चरित्रहीनो वा वर्तते, तान् दोषान् वयं दूरीकुर्मः, किन्तु नैवम् अर्थः कल यः

आदर्शवादः शिक्षकस्वरूपश्च

प्रकृतिवादः शिक्षकं सन्देहदृष्ट्या अवलोकयति, तम् अशुभरूपेण स्वीकरोति च, परन्तु आदर्शवादः शिक्षकस्य स्थानं सवापरि कल्पयति आदर्शवादः छात्रवत् शिक्षकमपि विश्वस्य तर्कपूर्णमंशं मनुते शिक्षकशिक्षार्थिनौ विश्वात्मनः अङ्गभूतौ द्वयोः स्वीयं स्थानं वर्तते, सम्पूर्णविश्वयोजनायां द्वयोः स्वीयं दायित्वमस्ति द्वयोर्मध्ये सम्बन्धोऽयमस्ति यत् अध्यापकः स्वव्यक्तित्वकृति यां छात्रे यः एतादृशं वातावरणं कल्पयेत् यस्मिन् वातावरणे विकासमवा य बालकः विश्वात्मनः नैकट्यं प्रा नुयात् अध्यापकस्य मार्गदर्शनेन छात्राः क्रमशः पूर्णताभिमुखाः भवेयुः

अध्यापकदायित्वसम्बन्धे आदर्शवादि दार्शनिका यां फ्रोबेल् पेष्टोलजि वर्णितमत्र उध्द्रियते तत्र विद्यालयम् उद्यानम् , शिक्षकम् उद्यानपालकम् , बालकान् उद्यानलतिकाः मन्यते बालकविकासस्य शक्तयः एवं प्रकारेण तदन्तर्निहिताः भवन्ति, यथा बीजे वृक्षस्य सर्वविधलक्षणम् अन्तर्निहितमस्ति उद्यानपालकं विनापि वृक्षो वर्धते, परन्तु कुशलपालकस्य कर्तव्येन तद्विकासः वा छितरूपेण भवति प्रकृतेः उपरि परित्यागेन वृक्षः नष्टोऽपि स्यात्, परन्तु कुशलोद्यानपालकस्य सामयिककायण जलसेचनेन प्राकृतिकप्रकोपाद्रक्षणेन समयानुसारं सारादीनां प्रदानेन च तस्य सर्वाङ्गीणो विकासः का तरूपेण भवति तद्वत् शिक्षकं विना बालकस्य शिक्षा जायेत, यतो हि

तदन्तर्निहितशक्तिकारणात् विकासः सम्भवेत् अध्यापकः स्वपक्षतः कामपि नवीनां शक्तिं न योजयति, परन्तु तासां शक्तीनां विकासाथ यद् वातावरणं पठन पाठन परिस्थितिश्च अपेक्ष्यते, तद् अध्यापकः कल्पयति तदभावे सु ाः शक्तयः कदाचित् न जागरि भवेयुः आवश्यकतानुसारम् अध्यापकः तत्र छात्राणां सहायतां करोति, तेषां ज्ञानपिपासां ज्ञानदानेन, परिहरति, सौन्दर्यपिपासां शमयितुं भावनात्मकसामग्रीः प्रस्तौति शिक्षणप्रक्रियायां शिक्षकशिक्षार्थिनोः सम्बन्धस्य एडम्स्- कृत-विवेचनम् -

१) शिक्षा द्विध्रुवीयप्रक्रिया अस्ति यस्याम् एकस्य व्यक्तित्वेन अपरस्य व्यक्तित्वं परिवर्तितं भवति तथैव तद्विकासाथ प्रयतते

२) एषा प्रक्रिया न केवलं सचेतनरूपा अपि तु विचारपूर्णा वर्तते शिक्षकस्य मनसि शिक्षार्थिनः व्यक्तित्वस्य रूपान्तरीकरणे स्पष्टसङ्कल्पो विद्यते

३) शिक्षार्थिनः विकासार्थम् उपकरणद्वयं प्रयु यते -(क) शिक्षकव्यक्तित्वस्य विद्यार्थिनः उपरि प्रत्यक्षप्रभावः (ख) ज्ञानस्य विभि रूपेषु उपयोगः [१४]

एडम्स् महोदयः ध्रुवद्वये एकं ध्रुवम् आदानात्मकं, द्वितीयं ग्रहणात्मकञ्च प्रस्तौति शिक्षकः छात्राणां सर्वविधविकासाय सहायतां करोति, छात्रोऽपि तत्सहायतया विकासमेति प्रक्रियामेनां निम्नोक्तरूपेण प्रस्तोतुं श यते -

शिक्षकः शिक्षणप्रक्रिया छात्रः

परन्तु कथनमिदं सत्यमस्ति यत् शिक्षकः स्वयं पूर्णताभिमुखं वर्धते, स्वयमपि विकासमा नोति छात्रस्य विकासेन सह शिक्षकस्य ज्ञानं व्यक्तित्वञ्च विकासं लभते तस्मात् निम्नोक्तरेखाकृतिद्वारा द्विध्रुवीयप्रक्रियायाः प्रस्तुतीकरणं युक्तिसङ्गतं स्यात् -

शिक्षकः शिक्षण-प्रक्रिया शिक्षाथ

उपर्युक्तविवेचनेन आदर्शवादः शिक्षकं प्रति शिक्षणप्रक्रियायामनुपमं स्थानं कल्पयति आदर्शवादानुसरं शिक्षकस्य अपेक्षिताः गुणयो यताः बट्लर् महोदयेन संगृहीताः संक्षेपेण ते गुणाः प्रदर्श्यन्ते [१५]

१) शिक्षकः बालकस्य कृते परंब्र स्वरूपः अपरिप बुद्धिबालकाय अध्यापक एव विश्वात्मरूपो भवति

२) अध्यापकः स्वछात्राणां विषये सम्यक् ज्ञानं प्रा नुयात् ,अन्यथा छात्राणां पाठनम् असम्भवमस्ति

३) अध्यापकः शिक्षणकलासु दक्षो भवेत्

४) शिक्षकः स्वीयज्ञानव्यक्तित्व-अध्यापन चरित्रप्रभावेण छात्राणाम् आदरं प्रा ुमर्हः स्यात्

५) शिक्षकः छात्राणां हितैषी मित्रश्च भवेत्

६) शिक्षके अधिगमाथ छात्रान् प्रेरयितुं,पठनाथ रू युत्पादनस्य च यो यता स्यात्

७) शिक्षकः जीवननिर्वहणकलायां निपुणः स्यात् यः अध्यापकजीवनं सो ासं न निर्वहति सः छात्रे यः जीवनश क्त प्रदातुं न श नोति

८) बालकं परिपूण कतु शिक्षकः ईश्वरस्य सहयोगीव भवेत्, यथा ईश्वरः मनुष्यं निरन्तरं पूर्णत्वाभिमुखं नयति, तद्वत् शिक्षकोऽपि छात्रं परिपूण कर्तुम् ईश्वरीयकाय सहायको भवति

९) शिक्षकः स्वविषयं सम्यक् बोधयितुं श नुयात्

१०) शिक्षकः स्वमनसि स्वीय अध्या यविषयस्य विषये गौरवभावान्वितो भवेत्

११) यः अध्यापनदायित्वं स्वीकरोति सः निरन्तरम् अध्ययनं कुर्वन् तिष्ठेत्

१२) शिक्षकः प्रगतिशीलविचाराणाम् अग्रणीः भवेत्

१३) शिक्षकः लोकतन्त्रस्य निर्माता भवेत् लोकतान्त्रिकसिद्धान्तेषु विश्वासं कुर्वन् कक्ष्याध्यापने तत्प्रयोगं कुर्यात्

१४) सः स्वीयस्मृतिशक्तेः अ यासं कुर्यात् येन छात्राणां स्मृतिशक्तिविकासे सहायता भवेत्

आदर्शवादिपाठ्यक्रमः

आदर्शवादः ज्ञानं सनातनम्, अनन्तम्, असीमञ्चेति विश्वसिति वस्तुतः ज्ञानं कदापि प्राचीनं न भवति विज्ञानस्य नवाविष्कारेण य ज्ञानं वर्धितं तदपि नव्यं ज्ञानं नास्ति, अपि तु त ज्ञानं मनुष्यस्य दृष्टिगोचरं नासीत् तस्य अनावरणमात्रं जातम् विज्ञानस्य सहयोगेन वयम् ईश्वरीयसृष्टेः विषये अधिकाधिकं ज्ञानं लभामहे एतदपि ईश्वरीयप्रकटनं (Revelation) मन्यते

लेटोमतेन जगदिदं विचाराणां सृष्टिरस्ति सूक्ष्मविचाराः शाश्वतास्सन्ति सर्वदा ते विचारा आसन् भविष्यन्ति च मनुष्य समाजः परिवर्तनशीलः,परन्तु विचाराः स्थायिनो भवेयुः, अतः पाठ्यक्रमस्य रचनाधारः न वा बालकः न वा समाजः अपि तु विचाराः आदर्शाश्च भवेयुः सूचनाः तथ्यानां संकलनञ्च ज्ञानप्रा ेः अथा नास्ति, तत् ज्ञानप्रा ेः प्रथमसोपानत्वेन अङ्गीकतु श यते

प्रकृतिवादः प्रयोजनवादश्च पाठ्यक्रमे वर्तमानोपयोगि अनुभवान् सम्मेलयतः परन्तु आदर्शवादी मानवजातेः सञ्चितसर्वानुभवान् अनुशासनात्मकज्ञानशाखासु संगृहीतान् मत्वा प्रददाति मानवजातिः सांस्कृतिकवातावरणस्य सर्जनं निर्माणञ्च अकरोत् छात्रान् आत्मानुभूत्यै प्रेरयितुं तद् आवश्यकम् , यत् मानवीयसंस्कृतिराशित्वेन तस्मै प्रदत्तमस्ति हार्न मतेन पाठ्यक्रमनिर्माणस्य दृ ाधारस्तु मनुष्यस्य आदर्शचरित्रम् ,आदर्शसमाजस्य लक्षणानि च भवितुमर्हन्ति, ततश्च जीवनादर्शपूता यो यान् तान् अनुभवान् क्रियाः जीवनपरिस्थितीश्च अध्येतव्यविषयत्वेन स्वीकुर्यात् पाठ्यक्रमे सत्यं, शिवं, सुन्दरञ्च बोधयितुं ज्ञानकर्मभावनाधारितान् विषयान् प्रकल्पयेत् [१६]

पूवाक्तस्य आदर्शत्रयस्य पूर्त्यथ बोगोस्लोब्स्की-महोदयः पाठ्यक्रमं चतुर्धा विभाजयति प्रथमभागः विश्वखण्डः इति कथ्यते , अत्र वैज्ञानिकविषयाः समाविष्टाः भवन्ति प्रकृतेः निज वशक्तयः, सौरमण्डलं , जीवनविकासः मानवीयनाटकपृष्टभूमिश्च अत्रैव समाविष्टाः भवन्ति द्वितीयखण्डः स यताखण्डः यस्मिन् सामाजिकविज्ञानमाग छति मानवसंस्थानां संसिद्धिः, वातावरण ेपरि नियन्त्रणं, जीवनयापनकला, भोजनं, वस्त्रं, निवासः, कला-कौशलं, सञ्चारव्यवस्था, शासनप्रणाली इत्यादयः अत्र अन्तर्भवन्ति तृतीयखण्डः संस्कृतिखण्डः, यत्र दर्शनं, कला , साहित्यं , धर्मः, वतावरणस्य व्याख्या इत्यादयः विषयाः भवन्ति चतुर्थखण्डस्तु व्यक्तित्वनिर्माणखण्डः, यत्र व्यक्तित्वस्य शारीरिक-प्राकृतिक-भावनात्मक-बौद्धिकपक्षाःभवन्ति एतेषां चतुणा खण्डानां समन्वयः व्यक्तित्वनिर्माणेन सह भवेत्, अर्थात् सत्यं, शिवं, सुन्दरम्, अथवा ज्ञानकर्मभावपक्षाणां सर्वप्रकारकं साम जस्यम् अध्ययनविषयेषु भवेत्

शिक्षणप्रक्रि या

आदर्शवादे कस्यचित् विशेषशिक्षणविधेः उ `खो नास्ति आदर्शवादिनः मन्यन्ते यत् कस्यचित् उद्देश्यस्य स्पष्टता भवेत् तर्हि तदुद्देश्यस्य पूर्तये स विधिः उपयुक्तः प्रतीयते तमेव विधिमङ्गीकुर्यात् विधिस्तु साधनमस्ति, साध्यं नास्ति साध्यस्य प्रकृत्यनुरूपं साधनस्य निर्धारणं कर्तव्यम् आदर्शवादः स्व सम्पूर्णा शक्तिम् उद्देश्यनिर्धारणे एव योजयति

विभि प्रचलितशिक्षणविधीनाम् अध्यापनसम्बन्धिमान्यतानां विषये आदर्शवादिविचारकाणां प्रतिक्रियाणामध्ययनमत्र संग छते

प्रत्यक्षाप्रत्यक्ष प्रणाल्यौ

आदर्शवादानुसारम् अस्य जगतः विषये ज्ञानं प्रत्यक्षप्रणाल्या दातुं श यते अत्र कोऽपि सन्देहो नास्ति यत् प्रत्यक्षप्रणाल्या अर्जितं ज्ञानम् अधिकरुचिकरं भवति तथैव स्मृतौ अर्जितज्ञानं तिष्ठति, परन्तु सव ज्ञानं प्रत्यक्षप्रणाल्या दातुं न श यते प्रत्यक्षपद्धतिद्वारा सामूहिकज्ञानं दातुं श यते, परन्तु यत् सामयिकं तदेव ग्रा मिति न वर्तते सञ्चित मानवस यतासंस्कृत्योः ज्ञानं परोक्षरूपेण शीघ्रतया सरलतया च वितरितुं श यते पुस्तकेषु सञ्चितस्य ज्ञानस्य अनन्तानुभवैः छात्राणां दूरे स्थापनं युक्तिसंगतं नास्ति तत्सञ्चित ज्ञानराशिमाधारीकृत्य तद् वर्धनाय छात्रस्य निर्माणं कर्तव्यम्

आत्मक्रि या प्रणाली

आदर्शवादः यन्त्रवादिभौतिकवादवद् अथवा प्रयोजनवादवत् उद्दीपनानुक्रियाफलस्वरूपं यद यनुकूलनं व्यवहारपरिवर्तनञ्च शिक्षेति न मन्यते आदर्शवादस्य विश्वासोऽस्ति यत् बालकः केवलमनुक्रियां कर्तुम् अङ्गी(Organism) नास्ति , अथवा मिथः क्रियाः (Interaction) कतु सामाजिकांशमात्रं नास्ति, अपि तु सः आत्मा वर्तते, यः स्वतः प्रेरणासामर्थ्यवान् वर्तते, तदनुक्रियाः(Responses) तत् स्वतः प्रेरणाम् उत्पादयितुं विकासमेतुं संघर्षमात्रं वर्तते शिक्षायाः वास्तविक केन्द्रविन्दुः छात्रान्तर्निहितोऽस्ति, शिक्षकः पितरौ वा तत्र प्रवेशं कतु नार्हन्ति तत् पार्श्वगामिनः भवितुमर्हन्ति अध्यापकेन कृतप्रयासं प्रति छात्रानुक्रिययैव शिक्षा सम्भवति अस्याः अनुक्रियायाः मूलं छात्रे एव विद्यमानमस्ति कापि वा शक्तिः एतत् सास्पर्ष्ट नार्हति संक्षेपेण वदामः चेत् आदर्शवादे शिक्षा स्वशिक्षैव जायते

हार्न-अनुसारं व्यक्तौ परिवर्तनमानेतुम् उद्दीपनस्य शिक्षणप्रक्रिया तावदावश्यकी नास्ति यावत् तदुद्दीपनं प्रति व्यक्तेः अनुक्रियायाः ज्ञानकर्मभावनानां वर्तते यत् ञ्जगद्विषयक अनुक्रियायाः ोतः मनो वर्तते अतः आत्मक्रिययैव विकासः सम्भवति हार्न लिखति -

मनसः विकासः अन्तर्विद्यमानस्य बहिरागमनं न तु बा ात् अन्तरभिमुखम् अध्यापकः छात्रान् शिक्षणस्य नदीपर्यन्तं नयति, किन्तु त ालं पाययितुं न श नोति, अध्यापकस्य शिक्षणहेतुत्वं यावत् नास्ति तावत् शिक्षणावसरस्य कल्पनं शिक्षणहेतुस्तु छात्रः स्वयमेव तथा तस्य मश्च वर्तते....... शिक्षाप्रा ये अन्तिमोत्तरदायित्वं छात्रस्य संकल्पशक्तेरुपरि वर्तते [१७]

आत्मविकासस्य उत्पादयित्री आत्मक्रिया अमूर्तप्रक्रिया नास्ति, यस्यां शारीरिकसामयिकतत्त्वानाम् अभावः स्यात् आत्मविकासाथ शारीरिकविकासोऽपि आवश्यकः स्यात् परन्तु विकासोऽयं आत्मविकासाथ समयसापे ः अतः शिक्षः आवश्यकर्नियमः समयोऽस्ति

आत्मक्रिया बा क्रियायाः समानार्थिका नास्ति एवं सत्यपि बालकाः क्रियाशीलाः भवन्ति तेषां क्रियाणां पूर्वनिर्धारणं कतु न श यते, केषाञ्चित् बालकानाम् आत्मक्रियाः शारीरिक क्रियारूपेण केषाञ्चिच्च कलात्मकाभि व्यक्तिरूपेण केषाञ्चिच्च शुद्धतया ज्ञानरूपेण च अभिव्यक्ताः भवन्ति

आत्मक्रियाथ संकल्पशक्तेः स्वतन्त्रता आवश्यकी आदर्शवादस्य सर्वप्रकारकशिक्षा चरित्रनिर्माणस्य शिक्षा भवति , चरित्रनिर्माणाथ संकल्पशक्तेः स्वातन् यं सर्वप्रथमम् आवश्यकम् बालक ः केवलं परिस्थितिक्रीडनकमिति नमन्तव्यम्, अथवा तथाङ्गीकरणेन सः दुश्चरित्रो भवति चरित्रवान् भवितुं संघर्षः कर्तव्योऽस्ति चरित्रहीनो भवितुं केवलं पलायनमेव पर्या मस्ति स्वतन्त्रता संकल्पस्य दृ शक्तिरस्ति न तु इ छाशक्तेः दुर्बलता

इ छाशक्तिस्वतन्त्रे छाश त्योः अन्तरज्ञानमावश्यकम् जन्मतः बालकेषु इ छाशक्तिस्तु भवति परन्तु सा स्वतन्त्रे छाशक्तिः नास्ति शिक्षया संकल्पशक्तिमेनां स्वतन्त्रता विवेका यां सह प्रयोगं कतु छात्राणां निर्माणं कुर्यात् स्वतन्त्रे छाशक्तेर्विकासः शनैः शनैः भवति किशोरावस्थायां प्रा ायां सत्यां

स्वतन्त्रे छाशक्ते: अभिव्यक्तिः द्विप्रकारेण जायते प्रथमप्रकारस्तु स्वतः स्वजीवनदर्शनस्य विकासः यत्र सः अन्येषां दृ ष्ट विनापि स्वतः स्व नैतिक विचारान् निर्णयति नैतिकदृष्ट्या सः संसारे आत्मानम् एकाकिनं मनुते स्वमाग स्वयमेव निर्धारयति द्वितीयप्रकारस्तु उत्तरदायित्वस्य निर्वहणम् किशोराः एतादृशान् बहन् अवसरान् लभन्ते यत्र उत्तरदायित्वेन सह काय कृत्वा आनन्दिताः भवन्ति

अनुकरणम्

आदर्शवादी अनुकरणं शिक्षणप्रक्रियायाःमहत्त्वपूर्णमङ्गं मनुते पित्रोः ,परिवारसदस्यानाम्, अध्यापकानां ,मित्राणां च व्यवहारस्य अनुकरणं कृत्वा अपरिप बालकः सामाजिकव्यवहारम् अधिज छति मानवशिशुः
कपि वत् अनुकरणं न करोति, अपि तु अनेकान् आनावश्यकव्यवहारान् त्यजति यः उपयोगिव्यवहारः भवति तं स्वीकृत्य आगते समये अपेक्षितं परिवर्तनं करोति , अनुकरणप्रक्रियया सह चलति न केवलं सामाजिकव्यवहारः अपि तु लेखनं ,पठनं जीवनस्य विश्वासः मूल्यम् इत्यादयः अनेकविषयाः अनुकरणेन जायन्ते

अनुकरणस्य प्रारम्भिकप्रयोगः स्थूलपदार्थानां क्रियाणाम् उत्कृष्ट-उदाहरणानाम् अनुकरणेषु क्रियते मूर्तिनिर्माणं,संगीतं,चित्रकला,लेखनम् इत्याद्युदाहरणानि छात्राणां सम्मुखे प्रस्तूयन्तां, छात्राः बुद्धिपूर्वकं तदनुकरणं कुर्युः इयमाशङ्का जायते यत् अनुकरणपरिणामः मौलिकतां (Originality) सर्जनात्मकतां (Creativity) न विकासयेत् ,परन्तु प्रयोगेण प्रमाणितमिदमस्ति यत् अनुकरणेन ईदृशं प्रेरणं ल यते यत् उत्कृष्टोदाहरणात् अधिकं सर्जनं निर्माणं वा करणीयमिति अनुकरणे तु प्रारम्भिकस्थूलसामग्रयः ल यन्ते परन्तु स्वीयं स्वतः प्रेरणया छात्राः तत्र मौलिकतामुत्पादयन्ति अनुकरणस्य द्वितीयप्रयोगस्तु व्यक्तीनामनुकरणम् शिक्षकः छात्रस्य कृते ेष्ठव्यक्तिः अस्ति सः इ छया अनि छयापि तद्व्यवहारम् अनुकरोति, आवश्यकमिदमस्ति यत् अध्यापकः निर्णयेत् यत् तस्य कीदृशान् व्यवहारान् ते अनुकुर्युः, तथैव सः छात्राणां सम्मुखे व्यवहरेत् अवा छितव्यवहाराणामनुकरणात् छात्रं निवारयेत् अनुकरणस्य तृतीयः प्रयोगः -राष्ट्रिय-धार्मिक- ऐतिहासिक-साहित्यस्य धीरोदात्तनायकानामनुकरणम् जीवद्व्यक्तीनां चरित्रं तु अपूण भवेत् परन्तु साहित्ये वर्णितमहापुरूषाः पूर्णरूपेण चित्रिताः सन्ति किशोरावस्थायां छात्राणां कृते

जीवने तादृश नायक नायिकाभिः प्रेरणा ल यते तेषां चरित्रस्य अनुकरणं कृत्वा तद्वत् ते भवितुं यतन्ते पाठ्यक्रमे पाठ्येतरक्रियासु च महापुरुषाणां जीवनगाथानां कृते महत्वपूण स्थानं दातव्यम्

चतुर्थप्रयोगः

व्यक्तिनिरपेक्षगुणानाम् अनुकरणाभिमुखं छात्राणां प्रेरणम् उत्तरकिशोरावस्थायाम् (Post-adolescentage) नायकसम्बन्धित- अनुकरणानि एव न भवन्ति, अपि तु गुणाः स्वतः मूल्यानि जायन्ते, तेषामनुकरणं त हित ेष्ठत्वेन जायते

अनुकरणस्य सवाच्चस्तरे गुणाः पृथक् पृथक् न भवन्ति, अपि तु तेषां समन्वयः शिवम् इति तत्त्वे भवति, एतद्धि आदर्शवादिचरित्रनिर्माणमथवा स्वतन्त्रे छाशक्तेर्विकासः इति निरूपयति

शिक्षण युक्तयः(Teaching Devices)

अध्यापने शिक्षकः अनेकप्रकाराः युक्तीः प्रयु क्ते पूर्वमेव अस्माभिरुक्तमस्ति विशिष्टोपकरणयु त्यादिषु आग्रही नास्ति सः प्रयोगप्रायोजनादिकं काय आनयति किन्तु तस्य दासो नास्ति तन्मते प्रयोगप्रायोजनादिद्वारा का त् विषयान् पाठयितुं श नोति परन्तु अध्ययने केवलं क्रिया हि महत्त्वपूर्णा नास्ति, चिन्तनवाचन- वण-मननादिकं महत्त्वपूर्णम् आदर्शवादी याः युक्तीः प्रयु क्ते ताः निम्नोक्ताः भवन्ति

साक्रेटिस्युक्तिः

इयं चर्चाप्रणाली अथवा प्रश्नोत्तरस्य उपक्रमः (Approach) प्राचीनकालात् प्रसिद्धा अध्यापकः यत् किमपि छात्रे य दयङ्गमं कतु वा छति तत् परिस्थितेः विश्लेषणरूपेण एवं प्रस्तौति यत् छात्रः अध्यापकस्य निष्कष स्वतः अङ्गीकरोति साक्रेटिस् तत्प्रयोगं नैतिकशिक्षाथ कृतवान् आसीत् किन्तु कालान्तरे ज्ञानात्मकविषयाणामध्यापनार्थञ्च एतस्य प्रयोगः बहलतया समजायत अस्याः युक्तेः वैशिष्ट्यं छात्रस्य सामान्यज्ञानात् शिक्षकः शिक्षामारभते ज्ञानस्य विश्लेषणं कृत्वा प्रश्नात्मकरूपेण उपस्थापयति, अन्ते प्रा व्यज्ञानस्य निष्कष छात्राः स्वयमेव निष्पादयन्ति कालान्तरे हर्बर्ट् पाठ्योजनायां वर्तमानकालिक

समस्यासमाधानप्रणाल्याश्च एतस्य प्रचुरप्रयोगो भवति कुशलाध्यापकस्य हस्ते आगत्य प्रश्नोत्तरोपकरणं ज्ञानस्य विकासे, चिन्तनवृद्धौ, यो यनिर्णयस्वीकारक्षमतायाः विकसने च सहायकं भवति , परन्तु अकुशलशिक्षकस्य हस्ते केवलं परिपाटिपालनाथ, पाठितसूचनानां परीक्षणाथ सामग्री भवति आदर्शवादी कामयते यत् चर्चया छात्राणां सम्मुखे विकल्पान् उपस्थापयेत्, तद्विकल्पेषु विचारपूर्वकं यो यविकल्पनिर्वाचने छात्राणाम यासः कारयितव्यः सदसतोः विवेकयुक्तभेदबोधस्य (Rational Disrcimination)विकसनम् अस्याः युक्तेः उद्देश्यं भवेत्

व्याख्यानम् -

अनेकतथ्यानि सूचनाश्च प्रत्यक्षरूपेण प्रा ाः न भवन्ति, न वा चर्चया बहगभीरविचाराः वाचनेनापि स्पष्टाः न भवन्ति तादृशविचाराणाम् अध्यापनं व्याख्यानेन सुयो यरूपेण कतुं श यते केचन विषयाः भावनात्मकाः प्रेरणात्मकाश्च भवन्ति तादृशविषयान् पाठयितुं व्याख्यानयुक्तिः सवात्कृष्टा मन्यते कुशलव्याख्याता (वा मी) ोतणां मनसि उदात्तभावं जागरयति काव्यमहत्त्वादिविषये व्याख्यानयुक्तिः प्रयु यते

प्रयोजना -

युक्तिरियं प्रयोजनवादस्य फलं मन्यते आदर्शवादिनोऽपि निस्सङ्कोचं युक्तिमेनां प्रयु जते विस्तरविवरणं प्रयोजनवादे द्रष्टव्यम्

आदर्शवादि-अनुशासनम्

पूर्वमेव स्पष्टीकृतमस्ति यत् छात्रः जन्मना न यो यः न अयो यो वा आदर्शवादः पूर्वजन्मार्जित पापस्यास्तित्वमपि स्वीकरोति, अतः अनुशासनसमस्यायाः विषये दत्तदृष्टिर्भवति प्रकृतिवादिवत् प्राकृतिकपरिणामान्

अनुशासनकारणं मत्वा छात्रं स्वतन्त्रं न त्यजति अनुशासनं शिक्षायाः अनिवार्यमङ्गमिति अङ्गीकरोति प्रायः एवं कथ्यते यत् आदर्शवादी दमनात्मकं § (Repressive) प्रभावात्मके(Impressionistic) अनुशासने विश्वासं कुरुते, यदि त छब्दानाम् उचितं व्याख्यानं न क्रियते तर्हि कथनमिदं सत्यं प्रतीयते तन्मतेन अनुशासनं प्रभावयितुं त्रीणि प्रमुखतत्त्वानि वर्तन्ते- १. शिक्षकः, २. प्राकृतिकं सामाजिकवातावरणञ्च, ३. स्वयं छात्रः विद्यालये यो यमनुशासनं निर्मातुम्

इदमावश्यकं यत् प्राकृतिकसामाजिक वातावरणं स्वस्थं भवेत् सामाजिक वातावरणस्य एकः घटकः शिक्षको ऽस्ति शिक्षकस्य प्रभावः छात्राणामुपरि प्रत्यक्षरूपेण परोक्षरूपेण च पतति शिक्षकः तस्मै ब्र णः रूपं भवति छात्रः शिक्षकस्य अनुकरणं प्रत्यक्षाप्रत्यरूपेण करोति इत्थम् आदर्शवादी अनुशासनस्य प्रभाववादी कथ्यते अनुशासनस्य सर्वप्रमुखं तत्त्वं छात्रः स्वयमेव छात्रः तानि कार्याणि प्रस तापूर्वकं करोति यत्र तस्य स्वाभाविक रुचिर्जायते रुचेः प्रयोगं कत्तु हार्न आशयः सम्प्रत्यक्षनियमस्य(Law of Apperception) अवबोधः अपेक्ष्यते रुचेः प्रभावकारि उपयोगं कतु छात्रेषु अन्तर्निहितरुचेः प्रदेयज्ञानस्य च सम्बन्धस्थापनमावश्यकम् हा कग् अनुसारं रुचिः मानसिकगत्या ता अस्ति, परन्तु गतिरसौ तदैव जागर्ति यदा सम्मुखे समस्या भवेत् अतः रु च जागरयितुं छात्रस्य सम्मुखे समस्या भवेत्

सर्वविधशिक्षायाः रोचकी करणं शिक्षायाः व्यापकदृष्टिकोणम् आदर्शवादः नाङ्गीकरोति चरित्रनिर्माणार्थमपि तन्न यो यं भवेत् यत् व्यक्तेः आचरणं रु याधारितं स्यादिति बहनि कार्याणि तत् तत् समये एव कर्तव्यानि भवन्ति तत्र रुचेः प्रतीक्षां कतु न श यते अनेके तादृशाः विषयाः बाल्ये शिक्षणीयाः भवन्ति, येषु स्वाभाविकी रुचिर्न भवति तथापि शिक्षणीयाः भवन्ति, अन्यथा भाविजीवनं कष्टकरं भवति जीवने अनेकानि कार्याणि रुचिपूर्णानि न भवन्ति, परन्तु तानि सदात्मकानि शुभानि भवन्ति, अतः कष्टकराण्यपि तानि जीवनाथ वा छनीयानि भवन्ति

एतद्विना अध्यवसायस्य समस्यायाः समाधानं भवेत् अथवा विना परि मं ज्ञानं प्रा येत, किन्तु सुखोपलब्धिर्न जायते अध्ययनाभिप्रेरणाथ कार्यसिद्धेः सुखमावश्यकमस्ति रुचिरपि द्विविधा भवति-तात्कालिकी स्थायिनी च प्रकृतिवादि प्रयोजनवादिनौ तात्कालिकरुचिमा यन्ति आदर्शवादी स्थायिरु च स्वीकृत्य छात्रे यः पलायनवादं न शिक्षयति स्थायिरुचेः काय सम्पादयितुं प्रथमम् अध्यवसायः कर्तव्यः यः मसाध्यः, अरुचिकरः, नीरसः, ान्तिप्रदश्च भवति, परन्तु कालान्तरे सैव अरुचिकरकार्यम् अ यासरूपेण परिवर्त्य सहजस्फूर्ति जनयति

आदर्शवादानुसारम् अनुशासनं शिक्षायाः आवश्यकनियमोऽस्ति शिक्षया सह अविनाभावरूपेण तिष्ठति शिक्षां विना अनुशासनस्य किमपि महत्वं नास्ति अनुशासनार्थम् अनुशासनं नास्ति

अनुशासनस्य उद्गमः छात्राणाम् आत्मश त्या भवति पूवाक्तवत् आदर्शवादिशिक्षा छात्रं स्वतन्त्रतायै स द्धीकरोति, या व्यक्तिः स्वेन्द्रियाणां स्वाभाविकरुचीनामपेक्षानुसारं व्यवहारं करोति सा स्वतन्त्रव्यक्तिरिति न कथ्यते आदर्शवादानुसारं स्वतन्त्रव्यक्तिः सा वर्तते यस्य संकल्पशक्ति स्वतन्त्रा अस्ति, या स्वसहजरूचिभिर्नियन्त्रीक्रियते शिक्षितमानवः मूलप्रवृत्तीनां दासो नास्ति अपि तु स्वामी वर्तते, तत्रैव तस्य स्वतन्त्रता निहिता अस्ति स्वमूलप्रवृत्तेः नियन्त्रीकरणं यदि दमनात्मकविधिश्चेत् तेषां मतेन आदर्शवादि-अनुशासनं दमनात्मकं कथ्येत भारतीयदर्शने इदमनुशासनम् आत्मसंयमः इति कथ्यते

दमनात्मकमनुशासनम् अन्यस्मिन् अथ प्रयु यते यत्र शिक्षकः बा ेपायैः कठोरदण्डैः छात्र सहजप्रवृत्तीः दमयित्वा अनुशासनं करोति, तथा दण्डभयेन समाजसम्मतं व्यवहारं शिक्षयति आदर्शवादः अनुशासनशिक्षणे अध्यापकस्य उचितमार्गदर्शनमङ्गीकरोति परन्तु दमनात्मकदण्डान् न मानयति यतो हि एतादृशमनुशासनं सामयिकं भवति, न तु स्थायि , अथवा स्वतः स्फूत भवति स्वतः प्रेरितानुशासनेन चरित्रनिर्माणं भवति न तु बा ानुशासनेन छात्राणामात्मशक्तिविकासाय अध्यापकः छात्रे यः स्वीयव्यवहारस्य विश्लेषणाय अवसरं प्रददाति तस्य विश्वासोस्ति यत् बालकेषु सहज न्यायभावना भवति, यदि ते यः आत्मविश्लेषणार्थमवसरो दीयेत तर्हि ते यो यमार्गचयने समर्थाः भवन्ति अध्यापकः व्यवहारस्य अनेकान् विकल्पान् छात्राणां सम्मुखे प्रस्तौति तथा छात्रे यः यो यविकल्पानां चयनार्थम् अवसरं प्रंददाति

आदर्शवादी लोकतन्त्रिकस्वशासनप्रणाल्यां विश्वासं कुरुते तथा अनुशासनस्य लोकतान्त्रिकप्रणालीम् आत्मसात् कुरुते अस्याः प्रणाल्याः विशदं विवेचनम् अर्थक्रियावादे क्रियते फलतः आदर्शवादी स्वतन्त्रतानुशासने, रुचि अध्यवसायौ इत्यादिशब्दाः विरोधात्मकाः इत्यनङ्गीकृत्य पूरकाः इति निर्णयति

****

६
शिक्षायां प्रयोगवादः

अर्थक्रियावादः दर्शनस्य सा शाखा वर्तते या पूर्वजन्मवादं पूर्वसिद्धसत्यं वा नाङ्गीकरोति अयं वादः प्रयोजनवादः, व्यवहारवादः , कारणवादः, पुनारचनावादः, अनुभववादः, फलानुमेयप्रामाण्यवादः , प्रयोगवादः इत्यादिभिर्नामभिः प्रथितोऽस्ति एतानि नामानि अर्थक्रियावादस्य लक्षणं स्फुटीकुर्वन्ति तथैव तानि विभि नामानि अर्थक्रियावादस्य विकासक्रमं स्पष्टीकुर्वन्ति वादोऽयम् अमेरिकाजनजीवनेन समुत्प । दार्शनिकी प्रणाली वर्तते

अर्थक्रियावादः एकत्र आदर्शवादप्रतिपादित पूर्वसिद्धसत्यस्य खण्डनं करोति, अन्यत्र च प्रकृतिवादस्य अमानवीयवैज्ञानिकसत्यस्य विरोधं करोति आदर्शवादानुसारं जगत्पूर्वनिर्धारितं (शिवश शीा पशव)पूर्णश्च वर्तते, सत्यं सार्वभौमिकसार्वकालिकश्च वर्तते दैवि-आदर्शवादस्तु मनुष्यभा यस्य कारणमज्ञात कश्चन परमात्मेति कल्पयति एतादृश्यां स्थितौ मनुष्येण किमपि कर्तव्यं नोपतिष्ठते एवमेव प्रकृतिवादोऽपि मनुष्यं प्रकृतेः क्रीडनकं मत्वा तस्य अस्तित्वमेव समापयति अर्थक्रियावादः तयोः द्वयोः सिद्धान्तयोः निषेधं कृत्वा नवविचारान् प्रतिष्ठापयति, यत्र सर्वत्र नकारात्मकता काचित् दृश्यते , तथा पूर्वनिधारितानां सवषां सिद्धान्तानां तिरस्करणप्रवृत्तिः दृश्यते अर्थक्रियावादस्य प्रमुखसम्प्रदायानां संक्षि विवेचनसिद्धान्तस्य स्पष्टीकरणदृष्ट्या उपयोगे भवति

पियर्स् महोदयस्य अर्थक्रियावादः अथवा व्यवहारवादः –

अर्थक्रियावादः अथवा "प्रे मेटिसि म्" इति शब्दः सर्वप्रथमं चार्ल्स सैण्डर्स् पियर्स्महोदयस्य पुस्तके उपल यते स तु विशेषरूपेण शब्दस्यास्य प्रयोगं कृतवान् ,येन कोऽपि एतत् चौय कर्तुम् अथवा तद्विचारस्य दुर्व्याख्यां कतु न श नुयात् पियर्स् महोदयः तार्किकदार्शनिकदृष्ट्या प्रतीकानां व्याख्यां करोति तन्मतानुसारं मनुष्यः प्रतीकानां निर्माणं करोति , तथा तेषामुपयोगं भाषारूपेण करोति, अतः भाषायाः सम्प्रत्ययाः दार्शनिकाध्ययनस्य महत्त्वपूर्णसमस्याः भवन्ति पियर्स् मतानुसारेण कापि धारणा अन्तिमा नास्ति, तासांमर्थः तद्व्यवहारेण प्रभावितो भवति, फलतः वास्तविकव्यवहारे ये प्रत्ययाः अथवा अभिधारणाः परस्परसम्बद्धाः वर्तन्ते, तेषां

पारस्परिकसम्बन्धम् उचिताथ अवलोकनं हि शिक्षणं वर्तते प्रचलित अभिधारणानां प्रत्ययानाञ्च स्पष्टीकरणमावश्यकम् अन्यथा तार्किकचिन्तनं न सम्भवति पियर्स् इदं कथयितुमि छति यत् सत्यस्य सर्वाः धारणाः तात्कालि यः भवन्ति, तासु निरन्तरं परिवर्तनं भवति, व्यवहारेण सह तासामर्थश्च परिवर्तते सत्यं पूर्वानुभूतं पूर्वसिद्धस्य आधारितं वा इत्यङ्गीकतु न श यते

विलियम् जेम्स् महोदयस्य अनुभववादः अथवा फलानुमेय प्रामाण्यवादः

पियर्स् महोदयस्य "प्रे मेटिसि म्" इति शब्दस्य जेम्स-महाभागेन लाघवं विचिन्त्वा "प्रे मेटि म्" इति संज्ञा प्रदत्ता वर्तते तथैव तस्य क्रमबद्धदर्शनस्य स्वरूपं प्रदत्तम् जेम्स् पियर्स् महाशयस्य विषयमेनमनुमोदयति यत् अर्थ क्रियावादवि ध विना पूर्वनिर्धारितोत्तराणां स्वीकरणं समीचीनं नास्ति सः लिखति-ङ्गअर्थक्रियावादी ....अमूर्तविचाराणाम् अपर्या तानां मौखिकसमाधानानां प्रागनुभूतकारणानां , निश्चितसिद्धान्तानां, बन्धितव्यवस्थानाम् , भ्रान्तपूर्णतानां सिद्धान्तैः विरतोऽस्ति [१] जेम्स् अनुसार विचाराणां प्रयोजनं मानवीयरुचीनां परितोषोऽस्ति विचाराः अनुभवान्तर्निहिताः सन्ति , अनुभवानां सिद्धान्तः एव विचार रूपेण प्रस्फु टितो भवति सत्यस्य मूल्यं व्यावहारिकं वर्तते यतो हि मानवीयावश्यकतानां पूरणाय मानवीयसमस्यानां समाधानाय च सत्यस्यावधारणा सहायकं भवति कस्यचिद् विचारस्य सत्यत्वासत्यत्वज्ञानं तस्य कार्यात्मकपरिणामेन भवति जेम्स् एतस्यानुभववादिविधेः विस्तारं नैतिकधार्मिकप्रश्नानामुत्तरान्वेषणाय च कृतवान् तन्मतेन कस्यापि नैतिक विचारस्य विचारः व्यावहारिक परिणामेन भवति इत्थं सः आदर्शवादिनः पूर्वनिर्धारित नैतिकसिद्धान्तं न स्वीकरोति धार्मिकविश्वासस्य उपरि जेम्स् मतमस्ति यत् यदि एतेषां विश्वासानां फलं जीवनसंघष सहायतां करोति तथा तेषामान्तरिकशान्ति प्रापयति तर्हि, अनुभवाधारेण तेषां सत्यापनं भवति तथा तदृष्ट्या ते विश्वासाः सत्यात्मकाः कथ्यन्ते, अन्यथा न

शाश्वतमपरिवर्तितं सत्यं जेम्स् न स्वीकरोति सत्यस्य प्रकृति सम्बन्धे सत्यस्य मान्यता अस्ति यत् सत्यं बहधा वर्तते तच्च निर्मितं भवति, तथा निरन्तरपरिवर्तनशीलमस्ति सत्यम् अस्माकं विचारस्य ज्ञानस्य भावनायाः कर्मणः च क्षेत्रे कार्यात्मकं सम्बन्धं स्थापयति सत्यं सः विचारोऽस्ति, यः व्यवहारे प्रभावं

जनयति सत्यं वस्तुनिष्ठं न भवति सत्यस्य स्थितिः व्यावहारिकी मनोवैज्ञानिकी चास्ति जेम्स् काण्ट् महोदयौ चिन्तनवग करणं निराकृत्य वदतः यत् एतद्वग करणानां प्रयोजनं विचारावगमो नास्ति अपि तु अनुभवान् नियन्त्रयितुं सहायताप्रदानम् सत्यं पूर्वनिर्धारितं न भवति अपि तु अन्विष्टं भवति, ता र्माणं कतुं श यते जेम्स् अनुसारं सत्यासत्यस्य किमपि स्थानं नास्ति, अपि तु निष्कर्षणात् तत् शुद्धमशुद्धं वा कथ्यते

जेम्स् अनुसारं जगदिदं पूण नास्ति सत्ता अनेकशक्तीनां संघातानां (Compunds) च मि णमस्ति, अतः तस्मिन् एकत्वापेक्षयाअनेकत्वं विद्यते जगति शुभाशुभरूपेण तद्विद्यमानमस्ति जगदिदमंशतः अनिण तमस्ति, मनुष्यः स्वतन्त्रश्च वर्तते, अतः मनुष्यस्य स्वै छिकाध्यवसायैः जगत् यो यं कतु श यते ईश्वरोऽपि अपूणोऽस्ति तथा मनुष्यः स्व प्रयासैः अस्य जगतः पूर्णत्वसम्पादनप्रक्रियायां सहायकोऽस्ति

जान् डिवीमहोदयस्य करणवादः(Instrumentalism) **प्रयोजनवादः** (Experimentalism)**पुनारचनावादः**(Re-Constructionism)

शिक्षायाः दृष्ट्या जान् डिवी कारणवादः महत्त्वपूणाऽस्ति असौ शिक्षाक्षेत्रे नव क्रान्तिमजनयत् डिवी महोदयस्य व्यवहारवादः कारणवादः इति कथ्यते, यतो हि तदनुसारं मस्तिष्कं ज्ञानञ्च उपकरणरूपेण प्रयु यते ते च ज्ञानमस्तिष्के साध्यत्वेन न मन्येते ज्ञानमस्तिष्कबुद्ध्योर्विकासः प्राकृतरूपेण भवति जीवनस्य विविधसामाजिकपरिस्थितिषु विजयं प्रा ुं मनुष्यः ताः प्रक्रियाः करोति याः उपोत्पाद्य रूपेण विकसिताः(Byproduct) वर्तन्ते मनुष्यः अन्वभवत् यत् विविधवस्तूनि द्रष्टुं तानि स्मतु तथा तद्विषये चिन्तनेन च तत् समान परवर्तिपरिस्थितिषु नियन्त्रीकरणं सरलं भवति मनुष्यस्य पाश्व मस्तिष्कं नाम तादृशमुपकरणमस्ति येन सः अन्यप्राणि यः आत्मनम् उ तं कतु श नोति तदनुसारं ज्ञानं मस्तिष्कादपि ेष्ठं नास्ति इत्थं डिवीमतेन मानवमस्तिष्कं तत्क्रियाणां प्रभावपूर्णतया संचालनाय साधनमथवा "करण" मेवास्ति

डिवी दर्शनस्य द्वितीयविचारः प्रयोगवादोऽस्ति डिवी प्रयोगात्मकवि ध वैज्ञानिकक्षेत्रे प्रयु ्क्ते , मानवीयसामाजिकसमस्यानां समाधानाय उपयोगिनं मनुते

डिवी मतेन अस्माकं चिन्तनप्रक्रियायां तानि सोपानानि आग छन्ति, यानि वैज्ञानिकप्रयोगशालायां प्रयोक्तुं श यन्ते यदि वयं स्वानुभवानां लाभं प्रभाविरूपेण स्वीकुर्मश्चेत् प्रयोगात्मकविधेः अथवा वैज्ञानिकविधेः प्रयोगः कर्तव्यो भवति विधिरयं (Problem -method) समस्याविधिः इति कथ्यते अस्य शिक्षणविधिदृष्ट्या महत्वपूर्णस्थानमस्ति , अतः अग्रिमपृष्ठेषु एतस्य सविस्तरं विवेचनं क्रियते डिवी प्रधानतया शिक्षादार्शनिकः आसीत् तन्मतेन शिक्षायाः अर्थमनुभवानां पुना रचना मन्यते, तस्मात् तस्य सिद्धान्तः पुना रचनावादः इत्यपि कथ्यते

तत्त्वमीमांसा :–

डिवीमतेन वस्तुनिष्ठस्य अस्तित्वस्य अस्माकं ज्ञानेन सह तादात्म्यं कदापि न भवति तन्मतेन अस्तित्त्वम् अनुभवाः एव केवलम् अस्तित्त्वम् अनेक वस्तुभिः व्यक्तिभिश्च युक्तमस्ति भौतिकजगतः विभि वस्तूनि परस्परं प्रभावितानि वर्तन्ते एवमेव समाजे मनुष्याः अपि परस्परं प्रभाविताः भवन्ति मानवीयानुभवे यः परं तादृशं किमपि सर्वव्यापि अस्तित्वं नास्ति, येन विश्वस्य व्याख्यां कतु श नुमः, अथवा विभि वस्तुषु एकत्वम् अवलो येत तन्मतेन एकत्वं कार्यात्मकेन (Functional) अथवा आङ्गिकेन (Ogranic) सम्बद्धमस्ति व्यक्तेः समाजेन सह तादात्म्यस्य अपेक्षया सः समाजेन सह कार्यत्मकरूपेण सहयोगं करोति

सत्ता परिवर्तनशीला–

अस्माकं जगत् निरन्तरं परिवर्तनशीलम् यथा मनसा वयं सत्तायाः चिन्तनं कुर्मः तदपि बुद्धेः प्रवहन्ती नदी इव अस्ति, या नित्यं नवीनं रूपं प्रस्तौति अनुभवस्य वृद्ध्या सह अस्माकं विश्वासाः समृद्धाः परिवर्तिताश्च भवन्ति मनुष्येण अनुभूतसत्तायां किमपि स्थायि नास्ति

जगदनिश्चितम् –

मनुष्योऽस्मिन् अस्थिरे सामाजिके जगति परिवर्तनस्य नद्याः वातचक्रस्य समानोऽस्ति, यत ् सामाजिकव्यवस्थाः अपि स्वीयचक्रस्य भ्रमिषु भ्रामयित्वा विनाशयति अथवा तेषु अचिन्त्यं परिवर्तनम् आनयति भौतिकसत्ता न मनुष्यं प्रीणाति न वा जुगु सते, परन्तु मनुष्यः तत् परिवर्तनशीलप्रकृत्या परिचितो भवेत् तथा तदथ स द्धः तिष्ठेत् प्रगतिः स्वतः न भवति मनुष्यः तदथ प्रयत्नशीलः भवेत्

मानवीय स्वतन्त्रता –

डिवी-अनुसारं मनुष्यः स्वतन्त्रोऽस्ति, परन्तु तस्य स्वतन्त्रता स्वीयप्रकृतेः केषाञ्चित् अनियन्त्रिततत्त्वानाम् अन्य परिस्थितीनाञ्च कारणेन सीमितं भवति डिवी स्वातन्‍ यस्य वास्तविकताम् अङ्गीकरोति, व्यक्तिः तस्य अभिकरणमिति विश्वसिति स्वतन्त्रतापूर्वकं काय कतु मनुष्यः बुद्धेरुपयोगं कृत्वा कार्यमपि कुर्यात् बुद्ध्या वा छितलक्ष्याणां परिकल्पना जायते तासां पूत्य योजनाः निर्मातुं श यन्ते परन्तु विना काय लक्ष्यमपूण तिष्ठति

नैतिकता –

डिवी नैतिकसिद्धान्तान् प्रागनुभूतयथार्थाधारेण पूर्णान् शाश्वतान् च न मनुते तदनुसारं नैतिकमूल्यानां नैरन्त यण पुनारचना जायमाना अनुवर्तते , यथा यथा ज्ञाने वृद्धिर्भवति तथा तथा सामाजिकपरिवर्तनं जायते तथा तथा नैतिकमूल्येषु अपि परिवर्तनमायाति इत्थं डिवी-महोदयः नैतिकमूल्यं सापेक्षदृष्ट्या अधिकं स्थायि मनुते शुभं तु एकदिनपर्यन्तं न भवति, अपि तु सुदीर्घकालपर्यन्तं शुभं भवति कस्यापि व्यवहारस्य सत् तथा यस्करत्वं तावत् कालपर्यन्तं भवति यावत् तेन सवऽपि मनुष्याः प्रभाविताः भवन्ति

डिवी नैतिकमूल्यानि त्रिधा स्वीकरोति, यथा १) लोकतन्त्रं, २) विचारः वाक्स्वातन्‍ यं च, ३) नैतिकं विधिप्रबन्धश्च

धार्मिकमूल्यानां विषये डिवी विश्वसिति यत् धार्मिको भवितुं कस्यापि आध्यात्मिकसत्तायाः पराप्राकृतिकसत्तायाः विश्वासो न काम्यते इत्थं कस्यापि सम्प्रदायविशेषस्य पूजापाठादिकमपि नापेक्ष्यते अन्धविश्वासं विनापि जनः धार्मिको भवितुमर्हति डिवी मतेन धार्मिक ेतः अस्माकं कल्पना अस्ति, येन साहित्यकलादीनामुद्गमोऽभवत् इन्द्रियानुभूतज्ञानमस्म यं वर्तमान-अतीतयोः परिचयं कारयति, परन्तु कल्पना अस्मत् तद् भविष्यपर्यन्तं ग छति यद् अनिश्चितमस्ति मनुष्यः भविष्ये कल्पनया प्रकल्पितमूल्यानि यानि प्रा ु श नोति , स च आदर्शः इति कथ्यते मानवाध्ययवसायेन तान् आदर्शान् यथार्थान् कतु या अनुभूतिरपेक्ष्यते सा "आस्था" इति कथ्यते डिवी अनुसारम् आदर्शः न वा कस्याञ्चित् प्रागनुभूतसत्तायां विद्यमानः न वा ञ्जआस्था अन्तःकरणस्य सहजानुभूतिर्वर्तते इत्थं जान् डिवी अनुसारं

धर्मः स्पष्टरूपेण आदश कृत सामाजिकनैतिकता सः मानवीयानुभवनिहिताऽऽस्थामङ्गीकरोति भावि-आदर्शानां कृते आस्था एवंरूपेण विद्यमाना वर्तते यत् वर्तमाने तत् कदापि प्रा ु श यते

डिवी महोदयस्य नैतिकता जैवसामाजिकी (Bio- Social) कथयितुं श यते तत् जीवनं प्रति समायोजनं त्रिधा भवितुमर्हति -

१) परिस्थित्यनुसारमात्मनः नियोजनम्

२) आत्मानुगुणं परिस्थितीनां परिवर्तनम्

३) आत्मनः व्यवहाराणां परिस्थितीनाञ्च पुनारचनम्

डिवी तृतीयप्रकारकं समायोजनं धार्मिकं नैतिकञ्चेति कथयति तथा तस्य मान्यतां प्रय छति

किलपैट्रिक्प्रयोजनवादः

शिक्षादृष्ट्या किलपैट्रिक महाशयस्य महत्त्वपूण स्थानमस्ति, यः खलु डिवी महोदयस्य समस्यासमाधानविधिम् अथवा वैज्ञानिकवि ध प्रोजे ट्प्रणालीरूपेण विकसितवान् सोऽपि अर्थक्रियावादिवत् विश्वस्य तर्कपरककाल्पनिकावधारणानां खण्डनमकरोत् तथा तस्मिन् स्थाने गैलीलियो प्रतिपादित वैज्ञानिक-

न्यादशन(Models) विश्वस्य व्याख्यां कतु प्रायतत किलपैटिक अनुसारं मानवीयानुभवानां प्रमुखोपलब्धिः नैतिकमूल्यं भवति तदनुसारं दर्शनं जीवनस्य संघर्षात्मकमूल्यानां समीक्षात्मकमध्ययनमस्ति दर्शनस्य कार्यम् एतदस्ति यत् संघर्षाणां मध्ये कथं जीवनं करणीयम् किलपैट्रिक महाशयोऽपि डिवी महाभागवत् नैतिकतायाः व्याख्यानं करोति यत् नैतिकता सामाजिकी भवति तथा अन्यैः सह मनुष्यस्य मिथः क्रियायाः आत्मनिर्भरतायाश्च परिणामेन नैतिकतायाः विकासो भवति इयमात्मनिर्भरता शैशवावस्थया समारब्ध भवति, जीवनस्य सवाच्चलक्ष्यं नैतिकक्रमविकासोऽस्ति

धार्मिकमूल्यमसौ एवं विवृणुते यत् सवाच्चमूल्यानि प्रति मनुष्यस्य मनोवृत्तिर्भवति अनुभवैः प्रा मूल्यान्येव धार्मिकमूल्यानि इति कथ्यन्ते मनुष्यः यत्किमपि अर्जयति तद्रक्षणं तद्वर्धनञ्च मानवीय-अध्यवसायानामुपरि नैर्भय करोति बुद्धिमत्तायाः पूर्णदूरदर्शितया सह अध्यवसायः आस्थेति कथ्यते

पूर्वोक्तानाम् अर्थक्रियावादिदार्शनिकानां मूलविचारज्ञानानन्तरम् अर्थक्रियावादिनां प्रमुखसिद्धान्तान् साररूपेण इत्थं प्रस्तोतुं श नोति

१) जगदिदं निरन्तरपरिवर्तनस्य क्रियया प्रचलति अस्मिन् जगति किमपि वस्तु स्थिरं नास्ति सव परिवर्तनस्थितौ वर्तते

२) जगतः प्रकृतिरनिश्चिता

३) जगदपूण वर्तते, तथैव अद्यापि तस्य निरन्तरं निर्माणं जायमानमस्ति

४) जगतः अन्तिमं किमपि तत्त्वं नास्ति तद् "युनिवर्स " नास्ति अपि तु "मल्टीवर्स " वर्तते

५) आदर्शः मूल्यश्च अन्तिमं चिरन्तनं च न स्तः मूल्यप्रक्रियायां निहिते भवतः, ते स्वतः लक्ष्यं नास्ति मूल्यं नैकमपितु अनेकानि वर्तन्ते तानि सापेक्षाणि परिवर्तनशीलानि च वर्तन्ते

६) जगतः पृष्ठतः अनुभवातीता काचित् सत्ता नास्ति

७) मनुष्यः परिवर्तनशीलः, संसारेण सह तस्यापि विकासो जायते

८) मनुष्यः जगतः सक्रियं कारणं नास्ति , परन्तु जगत समाजा यां सह तस्य अन्तः क्रियायाः फलस्वरूपं परिवर्तनं भवति

९) प्रगतिः स्वतः न भवति, तदथ प्रयत्नः करणीयः

१०) ज्ञानं क्रियामुत्पादयति

११) अनुभवस्य पुनर्निमाणमेव ज्ञानम् जीवनं सुचारुरूपेण यापयितुं ज्ञानं साधनमात्रमस्ति न तु साध्यम्

अर्थक्रियावादिशिक्षादर्शनम्-

डिवी शिक्षामनुपमां मनुते तदनुसारं मानवीयसंस्कृतेः संरक्षणं,संवहनं, पुनर्निर्माणञ्च प्रमुखतया शिक्षायाः माध्यमेन भवति सः दर्शनं शिक्षायाः सामान्यसिद्धान्तत्वेन अङ्गीकरोति अस्याशयस्तु दर्शनस्य काय तु

मानवीयानुभवानाम् अर्थान्वेषणं तदर्थानुसारं मनुष्यस्य जीवनयापनप्रकारस्य निर्धारणम् शिक्षा एव एतं धर्रयितुं श नोति यत् अस्माकं जीवनदर्शनं कीदृशं भवेत् शिक्षा जीवनस्य ताः समस्याः दार्शनिकस्य सम्मुखे प्रस्तौति, यासां सम्भावितोत्तराणाम् अन्वेषणाथ दार्शनिकः प्रयतते दर्शनेन प्रदत्तसमाधानानां

मूल्याङ्कनं शिक्षा प्रयोगेण करोति, क समाधानं व्यावहारिकम् अस्ति किञ्च अव्यावहारिकम् इत्थं शिक्षादर्शनयोः अन्तः क्रियाः प्रचलन्त्यः भवन्ति

डिवी शिक्षायाः बा सामाजिकराजनैतिकशक्तीनां माध्यमेन शिक्षानीतेः निर्धारणपक्षे न वर्तते तदनुसारं शिक्षा स्वलक्ष्यनिर्धारणे स्वतन्त्रा भवेत् समाजस्य दायित्वं संस्कृतेः फलोपभोगो नास्ति अपि तु संस्कृतेर्विकासार्थम् आवश्यकसाधनानां संग्रहः केवलं शिक्षामर्मज्ञाः एव एत णतुं श नुवन्ति यत् कीदृशः सांस्कृतिकविकासः भवितुमर्हति

शिक्षायाः परिभाषा–

जान् डिवी-प्रतिपादिताशिक्षायाः परिभाषा अद्यतन शिक्षाक्षेत्रे अत्यन्तं मनोवैज्ञानिकी कार्यकारिणी चेति सवरादृता वर्तते डिवी मतानुसारं "शिक्षा अनुभवानां पुनर्निर्माणप्रक्रिया वर्तते, थथा समृद्ध वैयक्तिक कुशलतया समधिकं सामाजिकमूल्यं प्रा भवति "[२]

उक्तपरिभाषानुसारं प्रतिक्षणं ज्ञातादज्ञातं प्रति स्व शिक्षा निरन्तररूपेण प्रचलति प्रतिदिनम् अस्मदनुभवाः परिवर्तन्ते नित्यम् अस्माकं सम्मुखे नव परिस्थितयः समाग छन्ति, परिस्थितिषु तादृशपरिवेशेषु च परिवर्तनेन सह मनुष्यः स्वक्रियां परिवर्तयितुं बाध्यो भवति नवपरिवेशेषु नव समस्यानां नवसमाधानानि अन्वेषणीयानि भवन्ति एतादृशपरिवर्तनेन समायोजनेन च अनुभवाः समृद्धाः भवन्ति एषा समृद्धिः तथा पुनर्निर्मितानुभवाः एव डिवी मतेन शिक्षेति कथ्यते एतत्परिभाषा परिणामेन शिक्षाक्षेत्रं संकीर्णत्वं परित्य य व्यापकंत्वामा नोति भवति शिक्षा विद्यालये प्रदीयमानज्ञानपर्यन्ता नास्ति, समग्रजीवनस्पर्शयित्री भवेत् यः विद्यालये अध्ययनं न करोति तस्यापि सततरूपेण शिक्षा चलति अन्तरं तु सा सुनिर्दिष्टा न भवति अस्याः परिभाषायाः अयमभिप्रायः यत् शिक्षा कस्मिंश्चित् अवस्थाविशेषे एव प्रा । न भवति अपि तु मनुष्यः यदार य अनुभवं कतु शक्तोऽस्ति एवमेव यावत् अनुभवं कतु क्षमते तावत् शिक्षा प्रचलति जन्मनः मृत्युपर्यन्तं शिक्षा प्रचलति एषा परिभाषा भ्रान्तिमिमां दूरीकरोति शिक्षोद्देश्यं भाविजीवनाथ स ाहो नास्ति अपि तु वास्तविकजीवनमस्ति अस्याः परिभाषायाः अनुसारं शिक्षायाः अर्थः शिक्षाप्रक्रियायामेव निहितोऽस्ति

शिक्षोद्देश्यम्–

अर्थक्रियावादः सर्वव्यापिसत्तायाः अथवा मूल्यानां विषये विश्वासं न करोति, अतः व्यापकचिरन्तनोद्देश्यस्य चर्चा न क्रियते यदा जगत्,जीवनं , मनुष्यश्च परिवर्तनशीलाः शिक्षायाः अन्तिमम् उद्देश्यं तदा कथं भवितुमर्हति भविष्यस्य सम्बन्धे यदा निश्चयो नास्ति तदा शिक्षायाः भावि-उद्देश्यं कथं भवितुमर्हति अर्थक्रियावादानुसारं शिक्षायाः उद्देश्यं शिक्षाप्रक्रियायां निहितमस्ति न तु भविष्ये प्रा यमाणस्य कस्यचित् लक्ष्ये अस्याशयः उद्देश्यं तात्कालिकसमास्यानां समाधानाय अस्माकं ध्यानं केन्द्रीकरोति, तथा अस्माकं चिन्तनं क्रियाञ्च अग्रे सारयति एवम् अनुभवानां पुनारचनया शिक्षा अग्रेसरा भवति इत्थम् इयं पुनारचना एव शिक्षायाः लक्ष्यमस्ति शिक्षया ताः परिस्थितयः प्रस्तुतीक्रियन्ते याभिः निरन्तरविकासो जायते शिक्षायाः प्रक्रिया समायोजनस्य सततप्रक्रिया, यया सर्वासु अवस्थासु विकासस्य अधिकाधिक क्षमतायाः विकासीकरणं शिक्षोद्देश्यमस्ति

तादृशः कश्चन समयः नाग छति यदा मनुष्यः नवीनानुभव प्रा स्थगयति, फलतः शिक्षा स्थगिता स्यात् , अतः शिक्षायाः अन्तिमं लक्ष्यमेव भवितुं नार्हति

अर्थक्रियावाद्यनुसारं शिक्षोद्देश्यं जीवनस्य निर्माणं नास्ति अपि तु वर्तमानजीवनं सुचारुरूपेण निर्वहणाथ शिक्षणमस्ति, वर्तमानानुभवानां पुनारचनया भविष्यस्य समस्याः सुचारुरूपेण परिहतु छात्राः ज्ञानं प्रा नुवन्ति बालकः वर्तमाने तिष्ठति सः भविष्यस्य विषये अत्यल्पं जानाति तद्विषये सः चिन्तितो नास्ति सः दूर विद्यमानानां विचाराणां विषये चिन्तयितुमसमर्थः अतः अग्रावलोकि (Forward looking) उद्देश्यं तस्योद्देश्यं नास्ति, तद् वास्तविकमुद्देश्यं कदाचित् स्यात् यदुद्देश्यं बालकस्य प्रकृत्याधारितं नास्ति तत् प्रा ुं कथं सः प्रेरितः भवेत्

एवं प्रतीयते यत् अर्थक्रियावादिनः दार्शनिकशिक्षायाः अपेक्षया अन्योद्देश्यस्य विचारमपि कतु ने छन्ति यथा उपरि एव निर्दिष्टमस्ति यत् अर्थक्रियावादानुसारं शिक्षाविकासयोर्मध्ये अन्तरमेव नास्ति, अतः शिक्षायाः उद्देश्यं तु छात्राणामधिकाधिक विकासोद्देश्यमिति वक्तुं श यते

अर्थक्रियावादी शिक्षायाः अन्तिमोद्देश्यम् अनङ्गीकृत्यापि विशिष्टध्येयानामुपेक्षां न कुरुते प्रत्येकसमस्यानां समाधानाथ कानिचन विशिष्टध्येयानि

उपस्थापयति, समस्यायाः समाधानाथ तेषां ध्येयानां पूरणं भवति, परन्तु तत् समाधनम् अन्यासां समस्यानां जन्म दद्यात्, तासां परिहाराय विशिष्टध्येयानां पृथक् उपस्थापनम् अपेक्षितं भवेत् अर्थक्रियावादः साधनसाध्ययोर्मध्ये भेदं न करोति यदद्य साध्यं तदेव श्वः साधनं भवति एवं प्रकारेण विशिष्टोद्देश्यानि सर्वासु परिस्थितिषु विभि ानि भवन्ति

सैद्धान्तिकदृष्टया अर्थक्रियावादे उद्देश्यानां चर्चा न क्रियते, परन्तु अर्थक्रियावादि कर्मणः शिक्षा संघटनस्य च विश्लेषणेन निम्नोक्तानि उद्देश्यानि निरुपितानि भवन्ति -

१) प्रभावि-अनुभवस्य रचनायाः एवं पुनारचनायाः क्षमतायाः विकासः

२) वैयक्तिकविकासेन सह सामाजिककुशलतयाः विकासः

३) लोकतन्त्रात्मक-आदर्शानां विकासः

अर्थक्रियावादानुसारेण छात्रस्वरूपम्-

अर्थक्रियावादानुसारं छात्रः अनुभवस्य केन्द्रबिन्दुः यदि सः अनुभवं कर्तुम् असमर्थश्चेत् तदीया शिक्षाऽपि न सम्भवति अनुभवस्य क्षेत्रम् इन्द्रियानुभवादपि विस्तार्य सामाजिकानुभवपर्यन्तं विस्तारयति प्रकृतिवादानुसारं छात्रः शरीरेन्द्रियमस्तिष्कादिभिः जातोऽस्ति, यः बा जगतः अनुभवं ग्रहीतुं श नोति, परन्तु अर्थक्रियावादिमते अयमनुभवः सामाजिकपरिवेशे भवति तथापि अर्थक्रियावादः आदर्शवादस्य तत्त्वं न स्पृशति, यत्र अनुभवस्य परिधिः आत्मानुभवपर्यन्तं भवति

अर्थक्रियावादी वैयक्तिकतां (Individuality) महत्त्वपूर्णमिति व्याख्याति सः वैयक्तिकीकरणं जीवनस्य महत्त्वपूण लक्ष्यं मनुते अनुभवस्य प्रवाहे असंख्याः मनुष्याः वर्तन्ते, एकाकिवस्तूतिः, एकाकिघटनाः, एकाकिसम्बन्धाः, एकाकिपरिस्थितयश्च भवन्ति सवषु एतादृश-एकत्वमस्ति यत् कोपि एकस्मिन् सिद्धान्ते

एंतान् आबन्धं न श नोति अनेन प्रकारेण वैयक्तिक छात्रः केवलं व्यक्तिर्वर्तते जीवनप्रक्रियया तत् पृथक् कतु न श यते परन्तु ते केवलं व्यक्तिरित्येव मत्वा तेषां विलक्षणतानुसारमेव शिक्षा भवेत्

प्रकृतिवादवत् अर्थक्रियावादिनः छात्रस्य व्यक्तित्वस्य प्रमुखः पक्षस्तु शरीरम् इति कथयन्ति विद्याथ सक्रियानुभवप्रा ये यत्नशीलो भवति सः निष्क्रियरूपेण बा जगतः प्रभावग्रहणं न करोति अपि तु अनुभवप्रवाहे सक्रियरूपेण अवगाहनशीलो वर्तते प्रकृतिवादिवत् अर्थक्रियावादी निष्क्रियरूपेण शिक्षादानस्य विरोधं करोति छात्रः कक्षायां तूष्ण निष्क्रियरूपेण शान्तः उपवेष्टुं न श नोति प्रयोजनवादानुसारेण बालकः सक्रियरूपेण ज्ञानोत्पादनं करोति , तथैव प्रा नोति , निष्क्रियरूपेण ज्ञानसञ्चयं न करोति

बालकस्य अस्तित्वं केवलमाङ्गिकं शारीरिकं नास्ति, प्रत्युत मनोवैज्ञानिकमस्ति अर्थक्रियावादी विश्वसिति यत् छात्रः अर्थनिष्पादनप्रक्रियायां भागं गृ ाति, तथा मूल्यानामनुभू त कतु श नोति अत एव मनुष्यः पशूनामपेक्षया ेष्ठो मन्यते जान डीवी कथयति यत् शिक्षकाः बालकानामेनां मनोवैज्ञानिकस्थितिमवग छेयुः बालकानां रुचिक्षमतास्वभावादि विषयाणां सम्यग्ज्ञाता शिक्षको भवेत्, तदैव सः सुचारुशिक्षाव्यवस्थां कतु श नोति

बालकस्य सहजप्रवृत्तीः रुचीश्च कथं शिक्षको जानीयात्, यावत्तेन सामाजिकतुल्याङ्काः (Equivalents)न परिज्ञाताः स्युः डीवी मानवजातेः विकासम् अतीतेषु द्रष्टुं तत्तुल्याङ्कान् अन्नेष्टुं च प्रयतते तथा भविष्ये तत्परिणामान् विचारयति जान् डिवी मतानुसारं शिक्षायाः आधारभूताः चतस्रो रुचयः ताः रुचयः-

१) वार्तालापस्य अथवा विनिमयस्य रुचिः

२) जिज्ञासा अथवा नवीनवस्तूनाम् अन्वेषणस्य रुचिः

३) निर्माणस्य रुचिः

४) कलात्माभिव्यक्तेः रुचिः

विनिमयस्य रुचिः सामाजिकाभिव्यक्तेः सरलोविधिः एतदथ भाषाशिक्षाप्रदानं महत्तमं साधनमस्ति

अर्थक्रियावादिनां मतानुसारं शारीरक मनोवैज्ञानिकपक्षा यां सामाजिकपक्षः महत्त्वपूणाऽस्ति उपर्युक्ताः चतस्रो रुचयः सामाजिकानुभवानां माध्यमेन विकासिताः भवन्ति एतत्सम्बन्धे डेवीमहोदयः अ वस्त्र निवासानां सम्बन्धिताः क्रियाः उ खन्

प्रस्तौति यत्, उपर्युक्ताः रुचयः एतादृशक्रियाणामनुसरणप्रक्रियया विकसिताः, अतस्ताः रुचयः अवैयक्तिकाः सत्यः सामाजिकानुभवं प्रय छन्ति

छात्रस्य सङ्कल्पनायाः तृतीयं प्रमुखं तत्वं तस्य सामाजिकं व्यक्तित्वं वर्तते "व्यक्तिः समाजरूपभित्तेः इष्टिका वर्तते " एतादृशी तुलना न समीचीना इष्टिकायाः अस्तित्वं भि त्त विनाऽपि भवितुमर्हति, परन्तु समाजं विना व्यक्तेः किमपि महत्त्व नास्ति अन्यजनैः सह मनुष्यस्य याः अन्तःक्रियाः भवन्ति, तासां फलस्वरूपेण तासां शक्तीनां विकासोऽभवत् समाजिक क्रियाः, संस्काराः, व्यवहाराः इत्यादि विधिना बालकः मानवीयत्वं प्रा नोति समाजः न केवलं व्यक्तीनां समूहः अपि तु व्यक्तीनाम् आङ्गिकं स टनमस्ति बालकः जन्मना शरीरं प्रा नोति, परन्तु यदा सः स्वमित्राणां विचारादर्शमनोवृत्त्यावश्यकतानां स्वविचारादर्शादिभिः सह तादात्म्यं कर्तुमारभते तदैव तस्य सामाजिकं पुनर्जन्म जायते अथवा सः संस्कारी भवति ज्ञानस्य महत्त्वं केवलं सामाजिकमस्ति, एतदथ भाषा सामाजिकत्वस्य आदानप्रदानक्रियायाः साधनं भवति, सैव ज्ञानप्रा त्यै परमं साधनमस्ति

जान् डिवी महोदयानुसारं बालकस्य वास्तविकी शिक्षा तदा जायते यदा तु सामाजिकपरिस्थितीनां स्पर्धायाः कारणेन तस्य शक्तयः उद्दी ाः भवन्ति , प्रारम्भे बालकस्य शक्तयः अविकसिताः भवन्ति , तासां विकासस्तु अन्यजनैः सह सामाजिक सम्बन्धस्थिरीकरणात् जायते प्रायः बालकः लघु लघु गैहिककर्मसु तृ तिं प्रा नोति सः पारिवारिकजनानां दैनिककायषु सहभावी भवितुमि छति, यतः तत्कर्मसु सामाजिकत्वं पश्यति, ततः आन्तरिकं सन्तोषं प्रा नोति

अर्थक्रियावादः शिक्षकस्वरूपं च

प्रकृतिवादवर्णनप्रसङ्गे सुपरिचितसाङ्केतिकेन वा येन शिक्षकस्य स्थानं स्पष्टीकृतमासीत् तस्यैव वा यस्य संशोधितं रूपं पुनरावर्तयितुं श नुमः यथा "अध्यापकः कृष्णाय लेटिन् भाषाम् अ यसितुं साहा यं ददाति " आदर्शवादे अध्यापकस्य दृष्ट्या लेटिन् भाषाप्रधानास्ति, शिक्षाथ कृष्णः अप्रधानः प्रकृतिवादे कृष्णः प्रमुखः, लेटिन् भाषा शिक्षकश्च गौणौ, परन्तु अर्थक्रियावादे लेटिन् भाषा यासं कृष्ण एव करोति , अध्यापकस्तु ताः सामाजिकपरिस्थिती आयोजयति फलतः कृष्णः लेटिन् भाषां सम्यग यसितुं श नुयात्

अर्थक्रियावादे अध्यापकस्य काय भि प्रकारकं मन्यते अध्यापकस्य प्रमुखं कायन्तु छात्रे यः प्रभावपूर्ण अनुभवानां प्रा ये उपर्युक्त परिथितीनां प्रकल्पनम् ते यः अध्ययनपरिस्थितिप्रकल्पनाय पूर्वयोजनां स ीकुर्यात् स्वयमध्यापकोऽपि अध्ययनसमूहस्य कश्चित् सदस्योऽस्ति छात्राणां यो यताः, आवश्यकताः ज्ञातुं सः प्रयतेत सः ताः परिथितीः प्रकल्पयेत् तद्वारा बालकानामावश्यकतानां पूर्तिः, क्षमतानां विकासः, अपेक्षितविषयसामग्रीणां प्रदानं जायेत सः छात्राणां स्वतन्त्रतां रक्षेत्. , अतः तद् हस्तक्षेपस्यावकाशः न्यूनो भवति परन्तु तस्यायम् अभिप्रायो नास्ति यत् तस्य स्वीयं स्वातन्‍ यं बाधितं स्यात्

अर्थक्रियावादे पूर्वयोजनायाः महत्त्वमधिकं वर्तते कक्ष्यायां परिस्थित्यनुसारं यो यपरिवर्तनं कुर्यात्, परन्तु तेन पूर्वयोजनायाः महत्त्वं न हीयेत

प्रायः भ्रान्तिपूर्णा युक्तिरियं प्रस्तूयते यत् यदाऽर्थक्रियावादानुसारं शिक्षा अनुभवानां पुना रचनामात्रमस्ति चेत् शिक्षकस्य विद्यालस्य वा आवश्यकतैव काऽस्ति अनुभवानां पुना रचना विद्यालयात् बहिरपि समाजिक परिस्थितौ जायमानाऽस्ति वस्तुतः बा जगतः सामाजिक परिथितिषु जटिलत्वं बह वर्तते, येन अनुभवानां पुना रचना शैक्षिकदृष्ट्या प्रभावपूर्णा न भवति, तस्मात् शिक्षकाणां प्रमुख दायित्वत्रयं वर्तते, यथा -

१) अनुभवप्रा ये सामाजिकपरिस्थितीनां सरलरूपस्य प्रस्तुतीकरणम्, यतः बालकस्य क्षमतानुसारं सरलतया अल्पसमयेन च शैक्षिकानुभवानामर्जनं कुर्यात् उदाहरणार्थम् - केन्द्ररा ययोः शासनं जटिलप्रक्रिया अस्ति, यां बालकः प्रत्यक्षानुभवेन ज्ञातुं न श नोति, अतः उक्त सामाजिक अनुभवान् विद्यालयः सरलरूपेण संक्षि रूपेण च प्रस्तौति

२) अनुभवस्य सर्वाः परिस्थितयः शैक्षिकादर्शाः न वर्तन्ते वास्तविके जगति वाणि यस्य सामाजिकानुभ वाः यदि प्रा ाः भवेयुः तदा क्रय विक्रयौ , लाभ- हानी इत्यादि विषयैः सह अनृतव्यापारः, तोलनदोषः , मि णम् इत्यादीनाम् अवा छित अशैक्षिक अनुभवानपि प्रा नुवन्ति शिक्षकस्य काय सामाजिकानुभवानाम् आदर्शस्य शैक्षिकमहत्त्वस्य च प्रस्तुतीकरणम्

३) वास्तविकजगति अनुभवाः सन्तुलितरूपेण प्रा ाः न भवन्ति कस्याश्चित्

परिस्थितेः अधिकानुभवाः कस्याश्चनपरिस्थितेः न्यूनानुभवाः प्रा ाः स्युरिति आशङ्का भवति शिक्षकस्य क्रम तु छात्राणां सम्मुखे

सन्तुलितसामाजिकनुभवानां प्रस्तुतीकरणं वर्तते

अर्थ क्रियावादी शिक्षकः कैश्चित् गुणैरन्वितो भवेत् अध्यापकः बालकानां सम्भावितशा तिषु अनन्तविश्वासं कुर्यात् छात्राणां वैयक्तिविषमतायाः सम्मानं कुर्यात् स्व- कर्मणः लक्ष्यं छात्राणां विकासः इति मन्यते अध्यापकाय मानवीयश त्यपेक्षया काचिदन्या शक्तिर्नापेक्ष्यते , बालकः स्वप्राकृतिकसामाजिकक्षेत्रेषु स्वतन्त्रोऽस्ति तस्मिन् सर्जनशक्तिरस्ति, यस्याः विकासः सामाजिक सहयोगेन सामाजिक-आदानप्रदानेन च सम्भवति

अर्थक्रियावादि शिक्षकस्य लोकतन्त्रे अचलविश्वासोऽस्ति, अध्यापनक्रियायां विद्यालय- संघटने सःआत्मानम् एकम् अंशं मनुते, न तु आत्मनम् अधिनायकम् सः छात्रेषु सहयोगेन कायसम्पादनस्वभावं जनयति

अर्थक्रियावादः पाठ्यक्रमश्च

अर्थक्रियावादिनः ज्ञानस्य स्वतन्त्रास्तित्वं नाङ्गीकुर्वन्ति , ते तु अनुभवस्य उपोत्पाद्यं ज्ञानम् , अनुभवस्य समृद्धौ सहायकञ्च भवतीति प्रतिपादयन्ति, अतः अर्थक्रियावादिपाठ्यक्रमे ज्ञानात्मक विषयाणां सूची न प्रस्तूयते एतदतिरि य ज्ञानं विविधखण्डेषु विभक्तमपि कतु न श यते, यतो हि अनुभवस्य क्रियायाः, वा .उत्पत्तिदशायाम् अनेकप्रकारकज्ञानानां युगपत् प्रवृत्तिर्भवति वृद्धाः मानवाः स्वसौविध्याथ ज्ञानं विविधखण्डेषु विभजन्ति परन्तु अर्थक्रियावादिनः सामाजिकानुभवानां माध्यमेन पूर्णज्ञानाय आग्रहं कुर्वन्ति

जान् डिवी मतानुसारं ज्ञानस्य संस्कृतेश्च विकासः मानवीय प्रमुखक्रियाणामनुसरणेन संजातः मानवजातिः अ - वस्त्र- निवास- सम्बन्धि- आवश्यकतानां पूत्य अनवरतरूपेण प्रायतत ये ये संघर्षाः समुत्प ाः तेषां समाधानाय च यत्नशीला वर्तते , यत्र संघर्षस्य आवश्यकता समभवत् तत्र संघषाऽपि कृतः एतेन अनवरत-परि मेण संघषण च ज्ञानस्य विकासोऽभवत्, यस्मिन् वैज्ञानिकप्रगतिः प्रविधि विकासः, सामाजिकसंस्थानां विकासः, भाषा- साहित्ययोः विकासः, दर्शनस्य ललितकलानाञ्च विकासोऽभवत् एवं प्रतीयते यत् जान् डिवी "कल्चर् इपोक् सिद्धान्तं

" प्रतिपादयति सः प्रबोधयति यत् बालकस्य समग्रविकासः एत ातीय प्रवृत्तीनामनुसरणेन जायते

डिवी एतद्विषये विरोधं प्रकटयति यत् औद्योगिकक्रान्तेः फलस्वरूपेण परिवारेषु जातीयप्रवृत्तिसम्बद्धकुटीरोद्योगाः विनष्टाः एतस्य परिणामोयं यत् बालकानां समग्रविकासस्य सम्भावनाभिः परिवारो वञ्चितोऽभवत् डिवी मतानुसारं परिवारे स्थित्वा बालकः पारिवारिककुटीरोद्योगेषु स्वयमपि भागं गृ ाति स्म, एवमेव समुचितप्रकारेण तस्य सामाजिकीकरणं (Socialziation) सम्भवति स्म पारिवारिककुटीरोद्योगैः सः सामाजिक-अनुभवान् प्रा नोत्, एवं प्रकारेण तस्य समुचित विकासः समभवत् यतः अद्य परिवारस्य असौ शैक्षिकावसरः विनिष्टः, ततः तत् कार्यदायित्वं विद्यालयस्योपरि समागतः तासां परिवारवियुक्त प्रवृत्तीनां विद्यालयीय कार्यक्रमेषु समावेशं कृत्वा तन्माध्यमेन बालकस्य समग्रविकासाय प्रयतेत एवं डिवी मतानुसारं सामाजिकानुभवसमृद्धजातीयप्रवृत्तयः (अ -वस्त्र-निवासादयः) विद्यालयीयपाठ्यक्रमस्य आधारभूतक्रियाः भवितव्याःभवेयुः

एतासां प्रवृत्तीनां माध्यमेन बालकस्य इमाः का ्क्षिताः सामाजिकरुचयः अभिव्यक्ताः भवन्ति ताः इमाः सन्ति -विनिमयः, जिज्ञासा, निर्माणं कलाश्च यासां विवेचनं पूर्वमेव कृतमस्ति अर्थात् उक्तप्रवृत्तीनाम् अनुसरणं कुर्वन् छात्रः भाषा सम्बन्धि यो यताः, दक्षताः च अर्जयेत्, अन्वेषणप्रकृतेः विकासेन वैज्ञानिकविषयेषु उ त प्रा नुयात् , निर्माणरुचेर्विकासेन प्रविधौ दक्षताम् अर्जयेत्, कलात्मकरुचेर्विकासेन ललितकलाः अ यसेत् परोक्षरूपेण सः गणितसम्बन्धिदक्षतामपि सम्पादयेत् तथा सः सामाजिक जीवनस्य परिचयमपि प्रा नुयात् यदि जान् डिवी महोदयेन प्रतिष्ठापितस्य चिकागोप्रयोगात्मकविद्यालयस्य पाठ्यक्रमं पश्यामश्चेत् उपर्युक्त सिद्धान्तस्य प्रयोगात्मकमुदाहरणं प्रा ु श नुमः डिवी महोदयस्य प्रायोगिक विद्यालये लेखनस्य पठनस्य गणितक्रियाणाञ्च माध्यमेन अध्यापनं नार यते गृहनिर्माणस्य (काष्ठ- कलायाः) वस्त्रनिर्माणस्य (कर्तनतन्तुसमवायीकरण- सीवनानि) भोजनस्य (पाक कलायाः) प्रभृतिप्रवृत्तिषु बालकान् योजयन्ति उक्तकार्याणि सुचारुरूपेण सम्पादयितुं परोक्षरूपेण सामाजिकविनिमयस्य विभि तत्त्वानां सम्पकषु बालकाः समायान्ति यथा वार्तालापः, लेखनं, पठनं, चित्रनिर्माणं, गणनमित्यादि

अर्थक्रियावादी वस्तुतः प्रमुखजातीयप्रवृत्तीः पाठ्यक्रमस्य आधारं कृणुते, परन्तु ज्ञानात्मक विषयेषु सामाजिकाध्ययनं महत्त्वपूर्णमिति वर्णयति, यतो हि सामाजिकाध्ययनं मानवीयानुभवान् प्रददाति तथा मानवस्य सफलतानां व्याख्यां करोति अर्थक्रियावादी विज्ञानस्य अमानुषीयविवेचनं ने छति यद्यपि सः सामाजिक समस्यानामध्ययनाय वैज्ञानिकविधिम् आ यितुम् अनुशंसनं करोति

अर्थक्रियावादेन प्रतिपादितपाठ्यक्रमनिर्माणसिद्धान्ताः संक्षेपेणेत्थं प्रस्तूयन्ते -

१) अनुभवकेन्द्रितः –पाठ्यक्रमस्य केन्द्रं न कोऽपि विषयः, विचारः, अध्यापकः, छात्रो वा भवति, प्रत्युत छात्राणां सामाजिकानुभवः भवति, अतः पाठ्यक्रमस्य आधारः छात्राणामनुभवः भवेत्

२) उपयोगिता –अर्थक्रियावादानुसारं ज्ञानं ज्ञानाय न भवति , अपि तु ज्ञानं जीवनसमस्यानां परिहारसाधनमस्ति, अतः छात्रे यः यत् किमपि ज्ञानं प्रदातव्यं भवेत् तस्य जीवनस्य उपयोगिताऽऽधारेण प्रदत्तं स्यात् य ज्ञानं तात्कालिकजीवनसम्बद्धं नास्ति तत्ज्ञान प्रदानं व्यर्थम्

३) रुचिः –बालकानां सहजसामाजिकरुचीनाम् आधारेण पाठ्यक्रमस्य निर्माणं भवेत्

४) क्रिया- सिद्धान्तः –पाठचक्रमे निष्क्रिय- ज्ञानानि न भवेयुः , व्यावहारिकक्रियाणां समावेशः स्यात् पाठ्यक्रमस्य पाठ्येतरक्रियाणाञ्च मध्ये प्रयोजनवादी भेदं न पश्यति क्रियाः मजन्याः (Manual) भवेयुरिति न बौद्धिकाः कलात्मकक्रियाश्च भवितुमर्हन्ति प्रकृतिवादिवत् अर्थक्रियावादी च प्रत्यक्षप्रणाल्या ज्ञानं प्रा ुम् आग्रहं करोति

५) समन्वयः –पाठ्यक्रमस्य विषयाः पृथक् पृथक् ज्ञानखण्डेषु विभक्ताः न भवेयुः, अपि तु बालकानामनुभवैः संयुक्तो भवेत् ज्ञानं समग्रमस्ति अतः तत् समन्वितरूपेण प्रदातव्यं भवेत्

अध्ययनाध्यापनप्रक्रिया

पठन पाठनप्रक्रियायाः सम्बन्धे अर्थक्रियावादिनः महद् योगदानं वर्तते प्रायः प्रकृतिवादिसमं योगदानमिति वक्तुं श यते पूवाक्तवत् जान् डिवी-मतानुसारं

विचारः क्रियायाः उपोत्पाद्यः वर्तते तदनुसारं शून्ये (Vaccum) किमपि चिन्तनं भवितुं नार्हति चिन्तनशक्तिम् उद्दीपयितुं काऽपि समस्या अवश्यं स्यात् सः हर्बट् महोदयस्य विचारमेनं नाङ्गीकरोति, यत् संवेद्यज्ञानस्य संचयेन वग करणेन च विचारो विकसितो भवति सः आदर्शवादिभिः प्रतिपादितध्यानविधिमपि चिन्तनार्थमावश्यकं न मनुते डिवी मतानुसारं यावत् क्रिया निर्बाधरूपेण प्रचलति
तावत् विचारप्रक्रिया उद्दी ाः भवितुं नार्हति यदा परिस्थितौ किमपि आकस्मिकं परिवर्तनमाग छेत् क्रियायामवरोधः जायते अथवा किमपि काठिन्यं समुपस्थितं भवेत् तदा विचारक्रिया समारब्धा भवति

विचारप्रक्रियामनुभवस्य पुनारचनाथ प्रभावोत्पादकरीत्या प्रयोक्तुं वैज्ञानिकविधीनां प्रयोगः परमावश्यकः डिवी महोदयः एनं प्रयोगविधिः अथवा वैज्ञानिकविधिरिति नाम्ना व्यवहरति शिक्षायां प्रयोगे कृते सति विधेरस्य समस्याविधिः प्रोजे ट् विधिः इति नाम्ना विकासो जातः

वैज्ञानिकविधेः सोपानानि

१) समस्यायाः बोधः -चिन्तनारम्भाथ प्राथमिकावस्था तु समस्यां प्रति चेतनशीलत्वम् अर्थात् विचारकः समस्यायाः स्पष्टं स्वरूपं जानीयात्

२) समस्यायाः तत्त्वानां विश्लेषणम् समस्यायाः स्पष्टज्ञानानन्तरं समग्रपरिस्थितेः उपरि ध्यानं केन्द्रितं क्रियते, समस्यायाः विभि तत्त्वानां विश्लेषणं क्रियते, विभि कारणानामन्वेषणं क्रियते, इत्थं प्रक्रियेयं तावत् प्रचलति यावत् समस्यायाः मूलान्वेषणं न जायते, अथवा सर्वथा सार्थकतत्त्वस्य प्रतिष्ठापनं न क्रियते

३) प्राक्कल्पनायाः निर्माणम् -

विचारप्रक्रियायाः तृतीयसोपाने समस्यायाः अनेकसम्भावित समाधानानि प्रस्तूयन्ते

४) प्राक्कल्पना -परीक्षणम् -

सम्भावित समाधानेषु सवाचित सम्भावनात्मकसमाधानं यदस्ति तस्य क्रियान्वयनम् अथवा प्रयोगाय कार्याचरणं क्रियते

५) मूल्याङ्कनम् -प्रा परिणामानामाधारेण किमपि समाधानं स्वीक्रियते

उक्तवैज्ञानिकविधेः प्रयोगः समस्यासमाधानविधिरूपेण अथवा

प्रायोजनविधिरूपेण कक्षाध्ययनाथ प्रयु यते प्रोजे ट्विधेः विवेचनात् पूव समस्याविधिना पाठनस्य एकं प्रकरणम् उदा यते - कक्षा दशमी, विषयः ब्रिटिश् संविधानम् , प्रकरणम् राजा(शासकः) तथा क्रिस्तमन्दिरसम्बन्धः

(१) समस्या- राज्ञा अष्टम-एडवर्ड इत्यस्य रा यपरित्यागः

(२) समस्यायाः विश्लेषणम् -

(क) राज्ञः एकया विधवस्त्रिया सह विवाहप्रस्तावः

(ख) ब्रिटिश् मन्त्रिमण्डलेन सह राज्ञो मतभेदः

(ग) राजा स्वे छया विवाहं कतु श नोति वा न वा

(घ) राज्ञा क्रैस्मन्दिरवैधानिकसम्बन्धः

( ) राजा कुलीनवर्गस्य कन्यया सह विवाहं कतु श नोति अथवा कस्यापि वर्गस्यकन्यया सह कुर्याद् वा

च) क्रैस् तमन्दिरे विधवायाः विवाहं सम्पादयितुं श यते किम्

३) प्राक्कल्पनानिर्माणम् –

(क)क्रैस्तमन्दिरस्य ब्रिटिश् शासकानां वैधानिकसम्बन्धे विवाहोऽयं निषिद्धः, अतः स राजा रा यम् अत्यजत्

ख) ब्रिटिश्संसद् राज्ञः वैधानिकसम्बन्धविवाहे बधिकाऽऽसीत्, अतः सः रा यं पर्यत्यजत् (ग) ब्रिटिश् परम्पराः विवाहे बाधकाः आसन् अतः राजा शासनं पर्यत्यजत्

४) प्राक्कल्पनापरीक्षणम् राज्ञः क्रैस्तमन्दिरवैधानिकसम्बन्धानाञ्चाध्ययनम् राजा मन्दिरस्य प्रमुखोऽस्ति देवालये विधवाविवाहः निषिद्धः देवालयस्य प्रमुखत्वेन सः स्वयमेव तान् नियमान् नो घयेत् अतः रा यत्यागस्य निश्चयः

५) निष्कर्षः –ब्रिटिश्संविधाने राजा कैस्तदेवालयस्य प्रमुखो भवति तथैव देवालयस्य सवः नियमैः सोऽपि बद्धो भवति

प्रयोगात्मकविधेः विकासरूपेण प्रोजे टविधिः समुत्प ोऽस्ति किल्पैट्रिक् महोदयः प्रोजे ट इत्यस्य परिभाषामेवं प्रकटयति- "तत् समस्यात्मकं कार्यमस्ति यत् स्वाभाविकरूपेण सम्पाद्यते " एतस्य कथनस्य मूलविचारोऽस्ति यत् विद्यालयस्य काय सहेतुकं स्वाभाविकञ्च भवेत् अध्ययनं रुचिकरं स्फूर्तियुक्तञ्च भवेत् , न तु

बलात् सम्पादितं भवेत् प्रोजे टविधेः अन्तर्निहितोऽन्यः गुणो वर्तते यत् पाठ्यक्रमं जीवनेन सह सम्बद्धं करोति, शिक्षायां निहितकृत्रिमतामपसारयति प्रोजे ट विधेः सोपानानि तु समस्याविधेः सोपानान्येव, केवलं नाममात्रं परिवर्तितमस्ति प्रोजे टविधेः सोपानानि निम्नोक्तानि भवन्ति -

१) योजनायाः चयनम् - छात्राध्यापकौ मिलित्वा अनुभूयमानानामावश्यकतानामाधारेण आयोजनम्

२) योजनायाः उद्देश्यस्य निर्णयः - (क) विषयस्य ज्ञान दृष्ट्या (ख) समयस्य दृष्ट्या (ग) कार्यस्य दृष्ट्या

३) योजनायाः रचनम् - कार्यक्रमस्य स ीकरणमित्यादि

४) क्रियान्वयनम् - योजनामनुसृत्य कार्याचरणमध्ययनञ्च

५) समीक्षा मूल्याङ्कश्च - योजनायाः परिपूर्त्यनन्तरं योजनायाः त क्षानुसारेण समीक्षणं मूल्याङ्कनञ्च

प्रोजे ट् प्रणाल्याः अनेके गुणदोषाः गण्यन्ते येषामत्र उ ेखो न क्रियते केवलम् एतावत् कथनं पर्या भवेत् यत् प्रोजे ट प्रणाल्या शिक्षा सहेतुकी भवति, ज्ञानार्जनं सक्रियरूपेण भवति तथा छात्राः निष्क्रियरूपेण नोपविशन्ति, अपि तु ज्ञानार्जने सक्रियाः भवन्ति, एतेन कक्षायाः वातावरणं लोकतन्त्रात्मकञ्च जायते, परन्तु अर्थक्रियावादिनः नायमाग्रहोऽस्ति यत् सम्पूर्णपाठ्यक्रमः योजनाविधिना सम्पादनीयः .इति विषयज्ञानस्य क्रमबद्धतां सम्पादयितुं दृ ीकरणार्थञ्च परम्परागताः अन्ये विधयः अनिवार्यरूपेण आनेतव्याः

योजनायां क्रियात्मक प्रवृत्तेरस्तित्वम् अनिवार्य नास्ति न वा अवश्यं योजनाः सामूहिकक्रियाःस्युः किल् पैट्रिक् महोदयः अनेकप्रकारकयोजनाः उ खति १) कासाञ्चित् योजनानां बा क्रियाः मूलरूपेण प्रधानाः भवन्ति , यथा वृक्षारोपणम्

२) कासुचन योजनासु कलात्मिका सौन्दर्यात्मिका च अनुभूतिर्भवितुमर्हति यथा सङ्गीतस्य कवितानाञ्च अध्ययनम्

३) कासुचिन योजनासु कौशलप्रा त्यै ज्ञानार्जनाय च प्रयत्नः क्रियते यथा सूत्राणां कण्ठस्थीकरणम्

उपर्युक्तविवेचनेन स्पष्टमिदं जायते यत् अर्थक्रियावादिनां विधिः ज्ञानप्रा ेः

आगमनविधिः वर्तते यश्च हर्बर्ट प्रतिपादित निगमनविधिना आंशिकरूपेण भि ो वर्तते आगमनविधौ छात्रः स्व प्रत्यत्नेन ज्ञानार्जनं करोति किन्तु निगमनविधौ अध्यापकेन ज्ञानं प्रदीयते, तथा छात्रः ज्ञानं गृ ाति हर्बर्ट डिवी महोदया यां प्रतिपादित पाठ्ययोजनानां सोपानानि -

डिवी (आगमनविधिः)	हर्बर्ट(निगमनविधिः)
क्रिया	स ाहः
समस्या	प्रस्तुतीकरणम्
प्रदत्तानां संकल्पनम्	तुलना
प्राक्कल्पनायाः निर्माणम्	सिद्धान्तनिरूपणम्
परीक्षणम्	उपयोगः अ यासश्च

प्रणालीद्वयेऽपि बालकस्य सहजरुचिविषये आग्रहोऽस्ति तथापि प्रणालीद्वये ब न्तरमस्ति उपर्युक्ततालिकया तत् स्पष्टं भवति, यत् हर्बर्टविधौ अध्यापकः बह सक्रियो भवति , छात्रस्य सक्रियता अन्ते निष्पद्यते निगमनविधौ छात्रः निष्क्रियरूपेण ज्ञानं गृ ाति एतद्विपरीततया डिवी महोदयस्य आगमनविधौ अधिगमसमये छात्रः सम्पूर्ण रूपेण सक्रियस्तिष्ठति

अर्थक्रियावादिविधेः केचन अन्ये सिद्धान्ताः निम्नोक्ताः वर्तन्ते

१) बालकस्य रुचिः -ज्ञानस्य स्वयं किमपि अस्तित्वं नास्ति, तस्य प्रयोजनं तात्कालिकावश्यकतानां परिपूर्तिः, अतः अधिगमप्रक्रिया बालकस्य सहजरु या समारब्धा भवेत् तदैव अध्ययनं रुचिकरं भवितुमर्हति प्रारम्भः रुचिकरश्चेत् छात्रः स्वे छया परि मे संल ो भवति, किमर्थमिति चेत् सः अधिगमस्य सार्थकतामनु भवति

२)ज्ञानस्य समग्रता –

अर्थक्रियावादी ज्ञानस्य विखण्डित रूपेण प्रदानस्य विरोधं करोति किमर्थमिति चेत् तस्य सार्थकता नास्ति अथवा सहेतुकत्वं न दृश्यते अर्थ क्रियावाद्यनुसारम् अध्ययनीयसामग्र सार्थकांशरूपेषु विभाजनमावश्यकम् अर्थक्रियावादिनः विचारानुसारम् एतेषामांशिकवर्गाणामाधारः जीवनस्य काचित् सार्थकसमस्या भवेत् न तु कश्चित् विषयविशेषः यद्येतत् असम्भवं विषयज्ञानाधारः

भवितव्यश्चेत् तस्यां स्थितावपि विखण्डितदैनिकपाठयोजनानामपेक्षया, आंशिकयोजनानामधिकं सार्थ यं समग्रत्वञ्च वर्तते

३) प्रत्यक्षज्ञानम् –

प्रकृतिवादस्य पश्चात् अर्थक्रियावाद एव एतादृशमेकं दर्शनं वर्तते यत् प्रत्यक्षज्ञानप्रा ये आग्रहं करोति अर्थक्रियावादानुसारं य ज्ञानं निष्क्रियरूपेण प्रा यते त ज्ञानं जीवने बहपयोगि न भवेत् ज्ञानस्य किमपि पूर्वनिर्धारितम् अस्तित्वं नास्ति ज्ञानस्य निर्माणं क्रियते तथा प्रत्येकं मनुष्यः स्वावश्यकतानुसारं स्व पद्धत्या ज्ञानार्जनं करोति सवषां यो यं सर्वव्यापि च किमपि ज्ञानं न भवेत् तदेव ज्ञानं सुदृ भवति यत् प्रत्यक्षरूपेण स्वप्रयासेन अर्जितं स्यात् समस्यानां समाधानाय कृतप्रयासेन सिद्धान्तः निरूपितो भवति, तादृशः सिद्धान्तः स्थायी भवति

४) सामूहिकक्रिया –

अर्थक्रियावादी वैयक्तिकभि तायाः, वैयक्तिक मस्य वैयक्तिकज्ञानार्जनस्य च विषये आस्थां कुर्वन् सामूहिक क्रियया अधिगमस्य क्रिया सम्पादनीयेति मनुते येन सामाजिकीकरणं भवति, एतत् सामाजिकीकरणं सामाजिककुशलतायाः सम्पादनाय आवश्यकमस्ति

प्रयोगवादी अनुशासनञ्च–

अर्थक्रियावाद्यनुसारम् अनुशासनस्य चत्वारि तत्त्वानि वर्तन्ते - (१) शिक्षाथ यः अनुशासने रक्षणीयोऽस्ति (२) शिक्षणप्रक्रिया, यां सुचारुरूपेण चालयितुम् अनुशासनमावश्यकमस्ति, ३) सामाजिकवातावरणम् , यस्मिन् अनुशासनं रक्षितं भवति, (४) स्वानुशासनं तथा बालकस्य रुचेः बा नि यन्त्रणेन सम्बन्धः

अर्थक्रियावादी अनुशासनस्य अथ सामान्यतया व्यव यमाणानुशासनस्य अर्थापेक्षया भि मङ्गीकरोति कक्ष्यायां छात्राः शान्तिपूर्वकम् अ यस्तन्ति अनुशासनस्य एनां परिकल्पनाम् अर्थक्रियावादी तिरस्करोति तन्मतानुसारं कक्ष्यायां सततरूपेण क्रियाः प्रचलन्त्यः भवेयुः छात्रेषु सामूहिकरूपेण विचारविमर्शोऽपि भवितुमर्हति , अतः अनुशासनस्य प्रयोजनन्तु कक्षायां व्यवस्थायाः संरक्षणं नास्ति अपि तु सक्रियरूपेण ज्ञानार्जनाय छात्रे यः अवसरप्रदानमस्ति

अनुशासनस्य कृते इदमावश्यकं यत् अधिगमविषयः क्रियाश्च

छात्ररूचिसम्बद्धाः स्युः यत् काय बालकानां रू या सम्बद्धं भवति छात्राः तस्मिन् सहजतया संल ाः भवन्ति, अतः अध्ययनक्रियायां बालकानां योजनात् प्राक् तेषां स्वाभाविक रू या क्रियाणां सम्बन्धस्थापनमावश्यकम् गैहिकक्रियाः क्रीडाश्च तेषां स्वाभाविक-आवश्यकताः वर्तन्ते तन्माध्यमेन ते सामाजिकसन्तुष्टिमनुभवन्ति एकवारं प्रवृत्तास्ते कठिनतरमपि कार्यम् अनुशासनपूर्वकं कुर्वन्ति कथमिति चेत् ते स्वयमेव अनुशासने बद्धाः भवन्ति

अर्थक्रियावादी मनुते यत् कार्यमेव स्वयम् एकः कठोरस्वामी वर्तते काय क्रीडनास्ति, यदा बालकः कस्याश्चित् क्रियायां संल ो जायते चेत् सः अनुशासने स्वयमेव बद्धो भवति, परन्तु एतदर्थमावश्यकं यत् काय सुनियोजितं भवेत् बालकः स्वयं योजनां स ीकुर्यात्, लक्ष्याणां निर्धारणं कुर्यात् समये समये च स्वकार्यस्य मूल्याङ्कनं कुर्यात् इत्थं व्यवहारस्य आत्मविश्लेषणेन सः अनुशासने आबद्धः तिष्ठेत्

जान डिवी विद्यालये गैहिकवातावरणं कल्पयितुमि छति परिवाराणां किमपि लिखितं विधानं न दृश्यते तथापि परिवारस्य सव सदस्याः सहजरूपेण स्व स्व कर्तव्यानि निर्वहन्ति प्रत्येक मानवस्य सामाजिकः नैतिकश्च विकासो जायते यदि विद्यालयेऽपि एतादृशपारिवारिकक्रियासु संल ाः भूत्वा पठनपाठनप्रक्रियाः आयोजिताः भवन्ति तर्हि अनुशासनस्य समस्या स्वयमेव परि ता भवति

अर्थक्रियावादी शिक्षार्थिनः स्वातन्‍यं कामयते, परन्तु सः अमर्यादितस्वतन्त्रतां नाङ्गीकरोति मनुष्यः समाजस्य अङ्गमस्ति अतः तत् प्रकृतौ सामाजिकत्वं निहितमस्ति अनुशासनस्य समस्यायामुपस्थितौ सत्यां विद्यालयः दण्डविधानी करणस्य अपेक्षया अर्थवादी सामाजिकप्रभावस्य प्रक्रिया महत्त्वपूणति मनुते तन्मतानुसारं विद्यालयस्य अनुशासननियमाः छात्रसहयोगेन निर्धारिता भवेयुः एवमेव अनुशासनभङ्गस्य विषये छात्रसमुदायस्य सहयोगेन विचारविमर्शः कर्तव्यः छात्रः स्वयमनुशासनसमस्यायाः विश्लेषणं कुर्यात् तथैव दण्डव्यवस्थाञ्च कुर्यात्, सव बालकाः सामाजिकत्वम् अङ्गीकुर्वन्ति एवं सामाजिकप्रभावः अनुसासनस्य सबलं साधनं भवितुमर्हति

अर्थक्रियावादस्योपलब्धयः क्षेत्रञ्च

अर्थक्रियावादः शिक्षायां नवीनां कान्तिम् अजनयत् कक्ष्यायाः सम्पूण वातावरणे नव्यंरूपम् आनयत् कक्ष्या नाम तूष्णीमुपविश्य ज्ञानप्रा स्थानम् इत्यवधारणापेक्षया छात्राणां क्रियात्मकं स्थानमिति पर्यकल्पयत् अर्थक्रियावादानुसारं छात्राः कक्ष्यायां मौनवृत्तिमासाद्य व्याख्यानं न शृण्वन्ति , अथवा रटनं न कुर्वन्ति अपि तु काय कुर्वन्ति सन्दर्भसाधनानामध्ययनं कुर्वन्ति, विचारविमश कुर्वन्ति, योजनाः निर्मान्ति प्रयोगञ्च कुर्वन्ति सम्प्रति अध्ययनं केवलं कक्ष्यायामुपविश्य करणीयं नास्ति, अपि तु प्रकृत्यबलोकनेन क्षेत्रभ्रमणेन च सक्रियरूपेण करणीयं कर्मास्ति अध्ययनप्रणाली तु व्याख्यानं प्रश्नोत्तरं पुस्तकपठनम् इत्यादि पर्यन्तमेव सीमितं नास्ति अपि तु साक्षात्कार-अवलोकन-प्रयोगपत्रव्यवहारादिविधिना अध्ययनं प्रभावि कतु श यते अर्थक्रियावादः बालकस्य स्वातन्‍ यमुद्घोषयति लोकतान्त्रिकयुगे व्यक्तेरेव अन्तिमं लक्ष्यं मन्यते, शिक्षायां याथाथ्य सर्वप्रथमतया अर्थक्रियावादे नैव स्वीकृतम् अर्थक्रियावादः बालकं निष्क्रियज्ञानग्रहणसाधनं न मनुते, बालकस्य शिक्षणप्रक्रिया सक्रियघटना इति मन्यते अर्थ क्रियावादः शिक्षायां वैज्ञानिकवि ध पर्यकल्पयत् वैज्ञानिकविधिः शिक्षायाः नानाविधिरूपेण प्रस्फुटितो अभवत् , यथा - समस्याविधिः, योजनाविधिः इत्यादयः विधिरसौ वैज्ञानिकमनोवृ त्त विकासयति तस्मात् वैज्ञानिकयुगानुरूपि वर्तते तथैव असौ बालकान् लोकतन्त्राय स ीकतु लोकतान्त्रिकविधिरस्ति योजनानां निर्माणं क्रियान्वयीकरणं मूल्याङ्कनञ्च लोकतान्त्रिकजीवनस्य चि वर्तते एतेन बालकेषु प्राक्कल्पनानिर्माणस्य योजनानां निर्माणस्य, समये समये तासां समीक्षणस्य च अ यासो जायते

अद्यतनयुगे यत्र ज्ञानमेव विस्फुटितं वर्तते तत्र अनवरतरूपेण स्वयमेव अध्येतुम् अयमेव एकमात्रं वैज्ञानिको विधिरस्ति

अर्थक्रियावादस्य दोषाः

अमेरिकादेशे अर्थक्रियावादिदर्शनं प्रगतिशीलशिक्षायाः (ैसीर्शी श एव र ेप) आन्दोलनरूपेण प्रस्फुटितमभवत्, परन्तु अद्य तद्दर्शनस्य सफलतायाः विषये अनेकाः आशङ्का जायन्ते जनास्तत्र प्रगतिशीलशिक्षया उद्वि ाः दृश्यन्ते, तत् परिणामतः तत्र केचन आदर्शवादिनः संजायमानाः दृष्टिपथमायान्ति विगतवषषु

ओराटा, विलियम् स्काट् हिल् , एल्सूवर्थ् का ल स् , कोनांट् बेग्ले प्रभृतीनां गवेषणात्मक-अध्ययनेन निराशाजनकतथ्यानि कानिचित् समागतानि अर्थक्रियावादिदर्शनस्य विषये इमाः काश्चन टि पण्यः -

१) विचारः क्रियया नोत्पद्यते, अपि तु अनेकवारं क्रियायां विचारस्य परिणतिर्भवति

२) बालकः केवलमनुभवस्य केन्द्रं नास्ति, तस्यास्तित्वं सामाजिकत्वापेक्षया आध्यात्मिकमस्ति अर्थक्रियावादः आध्यात्मिकपक्षमुपेक्षते

३) अर्थक्रियावादे काचित् नकारात्मकता परिलक्षिता भवति विद्यमानसिद्धान्तानां मूल्यानाञ्च तिरस्कारं विना अर्थक्रियावादेन न किञ्चित् कृतम् नवसिद्धान्तमूल्ययोः प्रतिष्ठापने अर्थक्रियावादः असफलोऽभवत्

४) अर्थक्रियावादः जीवनस्य सर्वासां समस्यानां विचाराय वैज्ञानिकविधेरूपयोगं करोति किन्तु विज्ञानस्य अमानवीय विवेचनस्य निन्दां करोति, अयमत्र विरोधाभासो दृश्यते, एतदतिरि य जीवनस्य भावनात्मक आध्यात्मिकप्रश्नानां विवेचनाय अन्यप्रकारविधिरपेक्षितो भवेत्

५) अर्थक्रियावादः चिरन्तनमूल्यानामुपेक्षां कृत्वा शैक्षिकमूल्यानामधोग त समपादयत्

प्रकृतिवादिशिक्षायाः सम्बन्धे कृतानुसन्धानानामाधारेण निम्नोक्ताः दोषाः अवलोकिताः भवन्ति -

१) क्रियामाध्यमेन प्रत्यक्षप्रणाल्या ज्ञानप्रदानस्य आग्रहेण शिक्षायाः स्तरस्य ासोऽभवत्

२) समस्या प्रणाल्या प्रयोजनविधिना च पाठनेन शिक्षायाः क्रमबद्धता विनष्टा भवति

३) क्रियायाः उपरि ब ाग्रहः

४) कोमलशिक्षाप्रणाल्या बालकान् वास्तविकजीवनाय स ीकतु न श यते तान् कृत्रिमे आशावादिप्रपञ्चे प्रेषयन्ति

५) ज्ञानात्मकविषयाणां स्थाने क्षुद्रक्रियात्मकविषयाः समागताः, एतेन स्तरः सति पाठ्यक्रमोपि असन्तुलितो भवति

उपर्युक्तदोषाणां सत्वेऽपि अस्माभिरिदमङ्गीकर्तव्यं भवति यत् अद्यतनयुगे अर्थक्रियावादस्य शिक्षायां यावान् विश्वव्यापिप्रभावोऽस्ति तावान् प्रभावः नान्यस्य दर्शनस्य भारतवष गान्धिमहोदयेन प्रतिपादित - मूलभूतशिक्षायाः अनेकानि तत्वानि डिवी महोदयस्य अर्थक्रियावादप्रभावितानि सन्ति

****

७

यथार्थवादः शिक्षा च

यथार्थवादः कस्याश्चित् एकस्याः सुसंघटित- दार्शनिक विचारधारायाः नाम न भवति अपि तु केषा विचाराणां प्रतिनिधित्वं करोति दर्शनमिदं वस्तुनः स्वतन्त्ररूपेणास्तित्वम् अस्तीति विचारयति आदर्शवादे अस्माभिरधीतमासीत् यद् वस्तुनः अस्तित्वमस्माकं ज्ञानाधारितं वर्तते यदि विचारो नास्ति तदा वस्तुनः कापि स्थितिर्नास्ति किन्तु एतद्वैपरीत्येन यथार्थवादी मनुते यत् वस्तुनः स्वतन्त्रमस्तित्वमस्ति, तदस्माकमनुभवे वतत न वा वतत वस्तु अथवा पदार्थः कस्यापि प्रकारस्य ज्ञानस्य आ यी नास्ति वस्तु तत् सम्बन्धिज्ञानञ्च पृथक् पृथक् विद्यमाने वतते संसारे बहनि वस्तूनि एतादृशानि वर्तन्ते येषां सम्बन्धे अस्माकं ज्ञानमेव नास्ति, परन्तु तस्य नायमर्थः यत् तानि नैव विद्यन्ते ज्ञानन्तु निरन्तरं वर्धमानं वर्तते, एवमेच नव नव वस्तूनां विषये अस्माकं ज्ञानञ्च विवर्धते जगतः सम्पूर्णरहस्यम् अस्मदज्ञानस्य परिधौ कदापि आगन्तुं न श नोति ज्ञानप्रा ः क्रमः निरन्तरं प्रचल व वतत, एवमेव ज्ञान वृद्ध्या सह वस्तुजगतः अस्माकं ज्ञानमपि अधिकं व्यापकं स्पष्टं च भविष्यति , तथापि ब वशिष्टं स्थास्यति, येषां विषये अस्माकं ज्ञानं स्पष्टं न भवेत् कथनस्य अयमाशयः यत् वस्तुनः स्वतन्त्रस्थितिरस्ति, यद्यपि अस्माभिः त ज्ञातमज्ञातं वा भवतु अस्माकं ज्ञानम् अस्म यं तत् स्थिति परिचयं कारयति, परन्तु तत् स्थितिविषये अस्माकं ज्ञानं न भवति चेत् तस्यास्तित्वं विनष्टं न जायते

उक्तविचारस्य परिपुष्ट्यै आदर्शवादि -अर्थक्रियावादि -सम्प्रत्ययैः सह सन्तोलनं समीचीनं भवेत् आदर्शवादानुसारं शाश्वतसत्यं तु विचारः, न तु , वस्तु वस्तु विचारस्य अपूर्णानुकृतिमात्रं भवति, अतः विचारस्य ज्ञानस्य वा अभावे वस्तुनः किम यस्तित्वं नास्ति अर्थक्रियावादः वस्तुनः स्थि त तु स्वीकरोति किन्तु तस्य अस्तित्वं मानसिकक्रियाद्वारा साधयितुं श नोति किमपि वस्तु विचारः क्रिया वा यावदनुभवद्वारा सत्यापितं न भवति तावत् तस्य अविद्यमानत्वेऽपि को यथा न वर्तते एतयोः द्वयोः विचारायोः भि ः तृतीयो विचारः यथार्थवादिनां वर्तते, ते मन्यन्ते यत् वस्तुनः अस्तित्वं स्वतन्त्ररूपेणास्ति अस्माकमनुभवेन ज्ञानेन च त ज्ञातं भवति यदि तद्विषये वयं न वि स्तदापि वस्तुनः अस्तित्वं तथैव स्थास्यति

यथार्थवादी वस्तूनां तद्गुणानाञ्च प्रा दृष्ट्या तत्र स्वतन्त्रांशद्वयं मनुते, उदाहरणाथ हिमं वस्तु वर्तते, शीतलत्वं तदीयो गुणः तदाधारेण यथार्थवादिनां सम्प्रदायद्वयं संजातम् नव्ययथार्थवादी वस्तूनां तद्गुणानाञ्च ज्ञानं स्वतन्त्रविषयद्वयमिति मनुते, उदाहरणाथ सूर्यः प्रकाशश्च, एतयोर्द्वयोः पारस्परिकसम्बन्धोऽस्ति सूर्यस्य प्रधानो गुणः प्रकाशः, परन्तु नेदमावश्यकं यत् प्रकाशस्य ज्ञानं विना सूर्यस्य अथवा प्रकाशस्य अस्तित्वमेव न भवेत् इदमपि आवश्यकं नास्ति यद् एकस्य ज्ञानेन अपरस्य ज्ञानं स्वत एव जायेत, अथवा एकस्य ज्ञानाभावे अन्यस्य ज्ञानं नैव भवेत्

द्वितीयसम्प्रदायस्तु वैज्ञानिकयथार्थवादिनां वर्तते येषां मतानुसारेण प्रत्येकं वस्तुनः गुणद्वयं भवति- प्राथमिकः आनुषङ्गिकः(Subsidiarya) ेति प्राथमिकगुणाः वस्तुगताः भवन्ति यथा- संख्या, परिमाणम्, भारः, मापनम्, आकारः इत्यादि आनुषङ्गिकगुणाः व्यक्तिनिष्ठाः भवन्ति ये प्रत्त्येक मनुष्यस्य स्वयो यता रु याद्याधारेण ज्ञाताः भवन्ति प्राथमिकगुणाः सवषां कृते समानाः दृश्यन्ते, किन्तु आनुषङ्गिकगुणानां ज्ञानम् अस्माकं कृते तद्रपेण प्रा यते यद्रपेण इन्द्रियानुभवः तान् अस्मत् सम्मुखे प्रस्तौति अस्माकम् इन्द्रियाणि तान् रूपान्तरीकृत्य अस्माकं समक्ष प्रस्तुवन्ति

यथार्थवादस्य प्रकारः

यथार्थवादस्यापि प्रकृतिवाद-आदर्शवाद-अर्थक्रियावादवद् अनेके सम्प्रदायाः वर्तन्ते परन्तु शैक्षिकदृष्ट्या यथार्थवादस्य निम्नोक्ताः सम्प्रदायाः सर्वाधिकप्रभावशालिनो वर्तन्ते

मानववादियथार्थवादः -असौ पारम्परिकैतिहासिकयथार्थवाद इत्यपि कथ्यते एतस्य जन्म सांस्कृतिक पुनरूत्थानयुगेन सह समजायत वादोऽयं मनुष्याय अतिप्राकृतिकशक्तेः प्राकृतिकशक्तेश्च बन्धनानि उन्मो चं सवा यं स्थानं प्राय छत् एतद्दार्शनिक विचारधारायाः आग्रहः तत्कालीन जीवनस्य प्रकृतेश्चाध्ययनाधारितः आसीत् प्राचीनमानववादस्य लक्ष्यन्तु ग्रीक्, लैटिन् भाषयोः साहित्यव्याकरणादीनामध्ययनमासीत् , परन्तु मानववादियथार्थवादी प्राचीन साहित्यं तात्कालिक जीवनस्य प्रकृतेश्च अध्ययनसाधनमकरोत् एतन्मतस्य प्रमुखप्रवर्तकाः प्रचारकाः तु ईरैसमस्- रैवेले मिल्टन् - आसन्

सामाजिकतावादियथार्थवादः सामाजिकतावादियथार्थवादस्य प्रमुखसमर्थकः ला र्ड माटन्, जान् लाक् आस्ताम् एतौ प्रचलित पुस्तकानां विरोधम् अकुरुताम् तेषां मतानुसारं पुस्तकीयज्ञानं मनुष्यं ज्ञानकोषं कर्तुमवश्यं श नुयात् , परन्तु तद् व्यवहार कुशलिनं जनं न करोति शिक्षायाः उद्धश्यं सामाजिककुशलताप्रदानं स्यात् एतन्मतेन बालकस्य शिक्षा व़्यावहारिकानुभवाधारिता भवेत् , न तु निष्क्रियतापूर्णतथ्यानां संचयनाधारिता

ज्ञानेन्द्रिययथार्थवादः –सम्प्रदायोऽयं प्रकृतिवादार्थक्रियावादयोः सर्वानुभवजन्यसिद्धान्तानां समाहारं प्रस्तौति अतः शिक्षाक्षेत्रे एतस्य प्रभावः सर्वाधिकोऽस्ति इङ्गलैण्ड देशे अद्यत्वे योऽयम् इन्द्रियानुभवविधिः (Emprical Method) कथ्यते अस्योद्गमः एतत्सम्प्रदायात् जातः इङ्गलैण्ड् देशस्य प्रसिद्धशिक्षाशास्त्री बेकन् , जर्मन्देशस्य राट्के , चेकोस्लोवाकिया देशस्य कामीनियस् एतत्सम्प्रदायप्रवर्तकाः मन्यन्ते

ज्ञानेन्द्रिययथार्थवादानुसारम् अस्माकं ज्ञानेन्द्रियाणि ज्ञानप्रा प्रमुखद्वाराणि भवन्ति, अतः यदेव ज्ञानम् एतेषां माध्यमेन प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा प्रा यत्वं तदेव वास्तविकं ज्ञानं भवति अवशिष्टं ज्ञानं शुष्कं निरूपयोगि भवति बेकन् आगमनवि ध प्रावर्तयत् यः शिक्षां वैज्ञानिकविधिमा यितुं प्रेरितवान्

यथार्थवादः शिक्षा च

यथार्थवादिशिक्षायाः क्रमबद्धविवेचनं हैरी-ब्राउडी महोदयस्य "बिल्डिग् एण्ड फिलासफी आफ एजुकेशन" (1954) पुस्तके प्रा यते प्रमुखयथार्थवादिशिक्षाशास्त्रिषु फ्रांसिस् - बेकन् , राटके, कामीनियस्, रसेल् , बाइटहैड् इत्यादयः प्रसिद्धाः वर्तन्ते

यथार्थवादो विद्यालयं मनुष्याणां निर्माणस्थानं मनुते कामीनियस्- अनुसारं जन्मना मानवशिशुः काश्चन शक्तीः स्वीकृत्य सम्भूतोऽस्ति, परन्तु तद्विकासः शिक्षयैव भवितुमर्हति तन्मतानुसारं शिक्षायाः अर्थः ङ्गनिर्माणम् अस्ति, ङ्गविद्यालयः मनुष्यत्व प्रकल्पनस्य यो यं स्थानं वर्तते

जान वाइल्ड महोदयोऽपि कामीनियस् कथनवद् एव कथयति तदनुसारं ङ्गमानवजीवनम ् वशंपरम्परानुसारेण बालकैः न प्रा यते, शिक्षया तदर्जितं भवति

अतः निर्धारणंच कर्त्तव्यमस्ति यत् स्वीयबालकानां कृते शिक्षायाः प्रकल्पनम्, शिक्षाप्रा ः मौलिकाधिकारः सर्वाधिकमहत्त्वपूर्णः इति

ब्राउडी महाशयः मतमिदं समर्थयन् सर्वकारविद्यालययोः सम्बन्धचर्चामकरोत् तन्मतेन कीदृशी अपि रा यप्रणाली भवतु सर्वकारः सर्वदा विद्यालयोपरि किमपि नियन्त्रणं करोत्येव कथमिति चेत् विद्यालयः एतादृशी समाजिकसंस्था वर्तते या अन्यसामजिकसंस्थाः प्रभावयति, अन्याभिः स्वयं प्रभाविता भवति ब्राउडी स्वयं सर्वकारनियंत्रणाधि यं न समर्थयति तन्मतेन सर्वासामपि सामाजिकसंस्थानां किमपि अद्वितीयं महत्त्वम् अस्त्येव, तत् कर्म ताः संस्थाः अन्तरा कयाऽपि अन्यया कतु न श यते एतद् अद्वितीयकर्त्तव्यत्वेन सर्वासामपि संस्थानां काचित् स्वायत्तता (Autonomy) उपलब्धा भवति अनया दृष्टया शिक्षासम्बन्धिनो ये विषयाः वर्तन्ते, तद्विचारे अन्यबा तत्त्वानां मार्गदर्शनं न काम्यते ताः संस्थाः शिक्षायाः विचारे शिक्षणव्यवस्थायाः मार्गदर्शनस्य भारं स्वयं वहेयुः एतत् कार्यनिर्वहणाथ शिक्षायां परीक्षितज्ञानराशिर्भवेत् , शिक्षनकलाऽपि एत ज्ञानाधारिता भवेत् ब्राउडी महोदयस्य मतमिदं ज्ञानसम्बन्धे यथार्थवादेन सह साम्यं भजते तदनुसारं "शिक्षाविज्ञानं, शिक्षणव्यवसायस्य स्वामित्वस्य ज्ञानं वर्तते, यथा आयुषः विज्ञानस्योपरि सवषां प्रभुत्वं न भवति तद्वत् शिक्षा विज्ञानस्योपर्यपि न सम्भवति"

शिक्षायाः उद्देश्यम्

मूल्यानां विषये यथार्थवादि दृष्टिकोणं व्यक्तिनिष्ठं न, अपितु वस्तुनिष्ठं वर्तते फलतः यथार्थवादस्यानुसारं शिक्षाया उद्देश्यं वस्तुनिष्ठं भवेत् , काल्पनिकं न भवेत्

यथार्थवादानुसारं शिक्षोद्देश्यं बालकस्य वैदुष्यविकासो नास्ति, यतः वैदुष्यं प्रायः शाब्दिकस्तरं बौद्धिकस्तरं च यावद् एव भवति शिक्षोद्देश्यन्तु वास्तविकजीवनं सुचारुरूपेण यापनकलायाः प्रशिक्षणम् व्यावहारिकजीवनं सुखपूर्वकं जीवितुं सामाजिकसंघटनैः सह स्वस्यानुकूल्यं सम्पादयितुं श नुयात् इट हैड महाशयः कथयति "शिक्षायाः उद्देश्यं छात्रे यः कस्यापि प्रविधेः , विज्ञानस्य, सामान्यज्ञानराशेः, कलात्मकसम्पदः ज्ञानप्रदानम् बालकस्य शिक्षायाः सर्वाण्यङ्गानि परस्परं प्रभावितानि

स्युः एस्.एल्. फिने महाभागोऽपि समायोजनस्याग्रहं कृत्वा लिखति, यत् शिक्षोद्देश्यं सामाजिक संस्थासु कार्याचरणे स्वदायित्वनिर्वहणाय व्यक्तिषु यो यतोत्पादनम् सामाजिक संस्थास्तु-परिवारः, उद्योगः,स्वास्थ्यसंरक्षणम्, रा यम् इत्यादिसंस्थाः फिने -अनुसारं शिक्षायाः दायित्वद्वयं वर्तते प्रथमं तु भाविसमाजस्य रूपरेखानिर्माणम्, द्वितीयम् उक्तरूपरेखायाः अनुसारं व्यक्तेः निर्माणम्

यथार्थवादेन प्रतिपादितशिक्षायाः महत्त्वपूर्णमुद्देश्यं वर्तते - वैज्ञानिकदृष्टिकोणस्य विकासः वैज्ञानिकदृष्टिकोणाथ तर्कपरकविवेक आवश्यकः वास्तविकज्ञानं तदेवास्ति, यद् विवेकयुक्तं भवेत् विवेकस्य त्रयस्तराः निम्नोक्ता भवन्ति

प्रथमस्तरः (इन्द्रियज्ञानम्) एतत् निम्नस्तरज्ञानमस्ति अस्मिन् स्तरे भौतिकपदार्थः भौतिक बा ेन्द्रियसम्पकण अस्पष्ट प्रतिमां (कल्पनां) प्रस्तौति, यतो हि पदार्थः आकारेण गुणैश्च युक्तो भवति तथैव भौतिको भवति इन्द्रियाणि पदार्थस्य केवलं गौणगुणानामनुभू त कतु श नुवन्ति प्रधानगुणावलोकने तानि न समर्थानि भवन्ति

द्वितीयस्तरः –द्वितीयस्तरः तर्कबुद्धिपरकज्ञानस्य भवति अस्मिन् स्तरे गौणगुणाः दूरीकृता भवन्ति तथा प्रधानगुणाः एव समक्षे तिष्ठन्ति वयं पदार्थस्य तत्त्वपर्यन्तं ग छामः तत्त्वमिदं स्थायिवद् भवति इयं विचारस्य स्थितिर्भवति स्तरेऽस्मिन् वयं पदाथ ङ्गप्रत्ययरूपेण अवग छामः अस्मिन् स्तरे सार्वदेशिक प्रत्ययस्योदयः भवति प्रत्ययज्ञानं मनुष्यस्य स्वीयोपलब्धिः प्रकृतौ एतस्य किम यस्तित्वं नास्ति

तृतीयस्तरः (कल्पना ज्ञानम्) - कल्पना अमूर्तप्रत्ययानां पुनर्मूर्तरूपप्रदानं करोति कल्पनया अमूर्तविचाराणां रुपं निष्पद्यते इत्थं विचारः पुनः पदाथन सम्बद्धो जायते एवमेव यथार्थवादिशिक्षकानुसारम् अन्यत् प्रमुखोद्देश्यं-बालकेषु तर्कबुद्धियुक्तज्ञानस्य इत्थं विकासीकरणं, येन ते इन्द्रियजन्य ज्ञानद्वारा प्रदत्तानां विश्लेषणं कतु श नुयुः तथैव तर्कबुद्ध्या तेषां यो यं ज्ञानं प्रा भवेत्

सोवियत्- रूस् देशस्य शिक्षापद्धतौ यथार्थवादि दर्शनम् अभिव्यक्तं भवति सोवियत् विद्यालयस्य उद्देश्यानां विश्लेषणं कृत्वा पश्यामश्चेत् वैज्ञानिकदृष्टिकोणः, परिवेषेण सह साम जस्यं , व्यावहारिकजीवनयापनं च शिक्षोद्देश्यानि इति सुस्पष्टं भवति रूसीय विद्यालयेषु शिक्षायाः निम्नलिखितानि उद्देश्यानि भवन्ति

१) अव्यक्तप्राकृत्रिक वातावरणं प्रति संवेदनशीलतायाः विकासः

२) कम्युनिष्टनैतिकतायाः विकासः, येन राष्ट्रं प्रति प्रजानां भक्तिः जागरिता भवेत्, राष्ट्ररक्षणस्य भावना सुदृ ा भवितुमर्हति

३) शारीरिकशिक्षा, शरीरस्य पूणा विकासश्च

४) मानसिक प्रशिक्षणं , येन विज्ञानस्य सिद्धान्ताः ज्ञाता भवेयुः , स्मृतेर्विकासो भवेत्, निरीक्षणकल्पनयोर्वृद्धिर्भवेत्, भाषायाः विकासः स्यात् , अधीतं ज्ञानं व्यावहारिके जीवने उपयुक्तं भवेत्

५) पोलिटे निकल् शिक्षा, यन्माध्यमेन विज्ञानस्य सिद्धान्तानां परिचयो जायते, तथैव परि ममहत्त्वस्य भावो विकसितो भवेत् [1]

छात्रस्वरूपम्

केषाञ्चिद् यथार्थवादिनां मतानुसारं "मनसः" पदार्थस्य च मध्ये कश्चित् सम्बन्धो वर्तते. यस्माद् एकः पदार्थः स्नायुसंस्थानं सुविकसितं भवति अनय दृष्ट्या छात्रस्य कल्प अतिविकसितमस्तिष्कवताम् अङ्गिरूपेण कार्या भवेत् दिक्कालेर्युक्तदृष्ट्याऽनया सः सवाच्च पदाथाऽस्ति यतो हि सः दिक्कालयोः परिधौ विभि पदार्थानां सम्बन्धं कतु श नोति एवम् एतद् देशकालयुक्तजगद्विषये चेतनशीलस्तिष्ठति योऽध्यापकः छात्रसम्बन्धिन सङ्कलनामेनां स्वीकरोति, सः स्व छात्राणां दिक् कालयुक्तजगति उपयुक्तसम्बन्धं स्थापयितुं संल ो जायते

यथार्थवादिनां मतानुसारं मानवशिशौ काचित् बौद्धिकीशक्तिरस्ति या अन्यप्राणिषु न प्रा यते, परन्तु शक्तिरसौ शरीरस्य कस्मिंश्चित् अङ्गविशेषे अथवा रूपरहितात्मनि न भवति बुद्धिरपि प्रतिभाकशक्तिः (इण्टेले चुअल् केपेसिटी) एव भवति ाइट् हेड् कथयति -

विद्यालये बालकः सक्रियमस्तिष्कः अङ्गीभवति, बौद्धिकक्रिया तस्य समग्रे शरीरे तथैव शरीरस्य प्रत्येकसंवेदनासु व्या ा भवति अधिगमप्रक्रियायाम्(Learning Process) असौ बौद्धिकक्रिया सक्रियरूपेण बहधा नेत्र-कर्ण-वाणी- हस्तेषु केन्द्रिता भवति इत्थं मस्तिष्कस्य क्रियायाः भौतिकसर्जनशीलक्रियायाश्च मध्ये समन्वयः स्थापितो भवति एवं प्रकारेण इन्द्रियाणां विचाराणाञ्च मध्ये समन्वयो जायते ३

इट् हेड् - अनुसारं बालकस्य मस्तिष्कं नवम जूषा नास्ति, यस्मिन् विचाराः पूरयितुं श यन्ते, न च तादृशं किम युपकरणमिदं यत् बौद्धिकविषयैः तीव्रं क्रियेत बालकस्तु सक्रियः प्राणी वर्तते, यस्य तात्कालिकशैक्षिकक्रियायाः आवश्यकता अस्ति शैक्षिकावसराणामुपयोगस्तु यदा कदापि करणीय एव शैक्षिकावसरस्य स्थगनं कतु न श यते बटण्ड् रसल् अनुसारं शिक्षितव्यक्तेः चत्वारि प्रमुखलक्षणानि भवन्ति अस्यायमाशयः यत् शिक्षया छात्रेषु निम्नोक्तगुणानां विकासः भवेत्

प्रथमगुणः शक्तिः, अर्थात् प्रत्येकं शिक्षितजनाः शारीरिकदृष्ट्या शक्तिशालिनी स्वस्थश्च भवेत्, येन सुखोपभोगं कतु श नुयात् दुःखस्य दूरीकरणं कतु च श नुयात्

द्वितीयगुणः साहसम् रसल् महोदयः एतस्य व्याख्यां व्यक्तित्वरूपेण कृतवान्, अर्थात् शिक्षितमनुष्यस्य व्यक्तित्वं संघटितं सन्तुलितञ्च भवेत्

तृतीयगुणः संवेदनशीलता, अस्य आशयोऽस्ति सद्गुणान् प्रति गौरवभावः तथा दुर्गुणान् प्रति घृणानुभूतिः सत्कार्य दृष्ट्वा मनसि प्रस ता भेवत् , तथैव दुष्कर्म दृष्ट्वा मनसि लानिः उत्प ा भवेत्

चतुर्थगुणः बुद्धिः, अस्यायमाशयोऽस्ति स्वयं ज्ञानी तथा ज्ञानप्रा त्यै ग्रहणशीलता वृत्तिः अर्थात् शिक्षितव्यक्तिः ज्ञानान्वितो भवेत् , तथैव नवीनज्ञानग्रहणाय तस्मिन् तत्परता भवेत्

यथार्थवादी छात्रं एतस्मात् संसारात् पलायितुं न शिक्षयति, अपि तु अस्य जगतः वास्तविकतानां संघर्षाय स ाहं करोति

सोवियत् रूस देशे बालकं सामूहिकजीवनस्य अङ्गं मन्वते बालकस्य शिक्षा बौद्धिकवातावरणे भवति, यत् शुद्धरूपेण नैसर्गिकं, भौतिकं, वैज्ञानिकञ्च भवति वातावरणसम्बन्धीनि सर्वाण्यपि तथ्यानि घटना वा वैज्ञानिकरूपेण व्याख्यातुं श यन्ते ज्ञानग्रहणशील -शिक्षाथ च एतत् भौतिकपरिवेषस्य अङ्गं मन्यते तस्मिन् अन्तर्निहितः कोऽपि आध्यात्मिकसत्तायाः विचारो न क्रियते सः एतस्याः आध्यात्मिकसृष्टेः कारणं न मन्यते, अपि तु अस्याः भौतिकप्रक्रियायाः अङ्गं मनुते साम्यवादस्य मान्यताऽस्ति यत् बालप्रकृतिः सामूहिकजीवनस्य अपेक्षां करोति

बालके ज्ञानस्य अनुभवानां च परिप ता वर्तते, अतः तस्मै स्व जीवनं सुचारुरूपेण सञ्चालयितुं समाजस्य आवश्यकता भवति बालकस्य काचित् मनोवैज्ञानिकावश्यता अस्ति - सा सुरक्षायाः भावना सः अपरिप : भवति अतः सः कर्तव्याकर्तव्यविवेकं निर्णतुं न श नोति एवं प्रकारेण कस्यापि कर्मणः कथं सम्पादनं कर्तव्यं तदपि स न जानाति, अतः समाजेन निर्मितप्रारूपे सः आत्मनं समायोजयितुं प्रयतते, इत्थं मनो वैज्ञानिकसुरक्षां प्रा नोति साम्यवादानुसारम् आत्मप्रतीत्यथ सामूहिकजीवनेन सह तादात्म्यम् आवश्यकमस्ति शिक्षया बालके यः एतादृशाः अवसराः प्रदत्ताः भवेयुः येन ते मनोवैज्ञानिकसुरक्षां तथैव अन्ततः आत्मप्रतीतिश्च प्रा ुं श नुयुः

शिक्षकस्वरूपम् –

यथार्थवादी अध्यापकः व्यक्तिनिष्ठताम् अतिरि य वस्तुनिष्ठ- मनस्स्थि त प्रा नोति आदर्शवादि शिक्षकवत् सः छात्राणां मार्गदर्शकः नास्ति, सः आध्यात्मिकजीवनस्य प्रतिभागी नास्ति, सः छात्राणां नियतिनिर्धारणं न करोति , स तु एको वैज्ञानिकोऽस्ति, विज्ञाने च तस्य अपारविश्वासोऽस्ति अतः स्वीय वैज्ञानिक दृष्टिकोणं छात्रेषु विकासयितुं प्रयतते

यथार्थवादी शिक्षकः गवेषणे विश्वसिति तस्य गवेषणविधिः वैज्ञानिकविधिर्वर्तते , यस्मिन् सर्वाणि अन्यद्विचलनानियन्‍ य, परीक्ष्य विचलनेषु प्रयोगं करोति अन्वेषणस्य परिणामानामुपयोगं सः स्वीयाध्यापने करोति यथार्थवादिशिक्षकस्य विश्वासोऽस्ति यत् सः सर्वज्ञः(Omaniscient) भवितुं न श नोति, तथा सर्वप्रकारकज्ञानानाम् अवा ये सः वृथा प्रयासं न कुर्यात् सः केवलं कस्मिंश्चित् विशिष्टे क्षेत्रे प्रविश्य गहनाध्ययनं कतु श नोति

यथार्थवादिशिक्षको मनोविज्ञानेऽपि आस्थां करोति, परन्तु व्यवहारवादिनां प्रायोगिकमनोविज्ञाने एव आस्था भवति मनोवैज्ञानिकाध्ययनेन अन्वेषणेन च सः स्वशिक्षणविधिषु संशोधनं परिवर्तनं च कतु प्रयतते यद्यपि मनोवैज्ञानिकाध्ययनेन छात्राणां रूचयः ज्ञातुं श यते शिक्षणं रुचिकरं कतु च श येत इति तस्य मतम् , अथाऽपि सः सर्वाः शिक्षणसमग्रीः रुचिकराः कतु न इ छति तस्य विश्वासोऽस्ति यत् कठिनतरस्य कार्यस्य सफलतापूर्वकं सम्पादनेनाऽपि महान् आनन्दो जायते स चानन्दः छात्राणामात्मप्रती त कारयति यथार्थतया वक्तव्यं चेत् "जीवने सव रुचिकरं

नास्ति, अरुचिकरं कठिनं कर्मापि करणीयं भवति, अय ीवनस्य याथार्थ्यानुभवः छात्रे यः शिक्षाग्रहणसमये दातव्योऽस्ति बटण्डरसलमतानुसारं यदि अध्ययनं रोचकं क्रियते तदा काऽपि हानिः न जायते परन्तु सर्वप्रकारान् अधिगमान् रुचिकरान् सम्पादयितुं प्रयासः कर्त्तव्यः अधिगमप्रक्रियायां काचित् नीरसता निहिताऽस्ति, यावत् सा अत्यधिका न भवेत् , तावत् तस्या नीरसतायाः अुपिगौरवमस्ति

छात्रैः स्ववातावरणेन सह साम जस्यं स्थापयितुं यथार्थवादि शिक्षकः अ यनुकूलनसिद्धान्तस्य (Principle of conditioning) उपयोगं करोति छात्रान् तादृशवातावरणे स्थापयति यत्र तेषां क्रियाप्रतिक्रियाः अ यनुकूलिताः नियन्त्रिताश्च भवेयुः छात्राणामनुक्रियाः केवलं वा छितक्रिया पर्यन्तमेव भवन्ति यथार्थवादानुसारं शिक्षायाः व्याख्या अ यनुकूलनस्य भाषया एवं स्पष्टीक्रियते -

Education is the conscious and organized effort of adults as organized in to society to predict and control through manipulation of the environment, the development of children in ways and toward ends, which are regarded by these adults as desirable. शिक्षकः छात्रे यः त ज्ञानस्य प्रायोगिकपूर्वा यासं दातुम् इ छति , यत् तस्य मिकोत्पदकरूपेण अथवा कार्यरूपेण उपयोक्तुं श यते सः छात्रे यः तां दक्षतां प्रशिक्षयितुमि छेत् येन ते कालान्तरे गृहस्थरूपेण, नागरिकरूपेण, उद्यमिप्रभृतिरूपेण च उपयोक्तुं श नुयुः

यथार्थवादिशिक्षकः समान्यरूपेण प्राकृतिकभौतिकवातावरणं महत्त्वपूण मनुते, परन्तु सामाजिकवातावरणमपि स्वीकरोति, तथैव तस्य अ यनुकूलं कत्तु प्रयतते

यथार्थवादानुसारं शिक्षक छात्रसम्बन्धः सर्वथा व्यक्तिनिरपेक्षो वर्तते व्यक्तिगतोऽनुरागः आसक्तिः इत्यादि भावना विशेषः शिक्षकशिष्यसम्बन्धे न दृश्यते

यथार्थवादः पाठ्यक्रमश्च

यथार्थवादे ज्ञानं महत्त्वपूण मन्यते तत् शैक्षिकप्रक्रियायाः महत्त्वपूर्णघटकं मन्यते यथार्थवादः प्रचलितधारणायाः अस्याः पुष्टीकरणं करोति यत् शिक्षायाः अर्थस्तु शिक्षार्थिना ज्ञानं प्रा यते इति आदर्शवादसमानं यथार्थवादोऽपि परम्परया

ज्ञानराशेः हस्तान्तरीकरणे विश्वासं करोति यथार्थवादी विश्वसिति यत् शिक्षया ज्ञानस्य संरक्षणं विकासश्च भवितुमर्हति

इट हेड् ज्ञानस्योपरि महान्तमाग्रहं करोति, परन्तु तदनुसारं ज्ञानं तथ्यात्मकापेक्षया व्यापकजीवनसम्बन्धि भवेत्

स्वयमर्जितं ज्ञानं हि बौद्धिक जीवनस्यान्तिमः आधारोऽस्ति प्रपञ्चे बहवो हि जनाः सामान्यबुद्धिमन्तो वर्तन्ते, तस्य कारणं तेषां समुचितज्ञानाभावः

" ब्रीड् " प्राचीनसञ्चित ज्ञानेन सह क्रियायाश्च महत्त्वमङ्गीकरोति बटण्डरसल् तात्कालिकोपयोगाय प्रयु यमानज्ञानेन सह दीर्घकालिकस्थायि ज्ञानस्यापि आवश्यकतां मनुते अर्थक्रियावादिवद् असौ नैतदङ्गीकरोति यत् सर्वमपि अधीतं ज्ञानं व्यावहारिकजीवनोपयोगि भवेत् केषांचन ज्ञानानां महत्त्वम् स्वतः अन्तर्निहितमस्ति, अतः बटण्डरसल् विकासशीलज्ञानेन सह सञ्चितज्ञानराशिमपि पाठ्यक्रमस्याङ्गं कर्त्तुमि छति फिने महोदयानुसारं पितृ यां यथा शरीरं बालकः प्रा नोति, तद्वत् समाजेन असौ सामाजिकं जन्म प्रा नोति बालकस्य व्यक्तित्वनिर्माणं केवलं शरीरेण न भवति , अपि तु विद्यालयेन प्रदत्तज्ञानेनैव भवति, अतः पाठ्यक्रमे प्रजातीय (Racial) ज्ञानस्य तथा नित्यशः प्रवर्तितज्ञानस्य प्राधान्यं भवेत्

सोवियत् - रूस्देशस्य पाठ्यक्रमः दृश्यते चेत् तत्र ज्ञानात्मकविषयाणां महत्त्वमधिकमस्ति, परन्तु ज्ञानात्मकविषय -क्रियात्मकप्रशिक्षणयोर्मध्ये सहसम्बन्धः अवलो यते मौखिकज्ञानेन सह व्यावहारिकप्रशिक्षणस्योपरि समानं ध्यानं दत्तमस्ति १९५५-५६ तमे वष दशवष यविद्यालयस्य पाठ्यक्रमं पश्यामश्चेत् समयविभाजनं निम्नोक्तप्रकारेण द्रष्टुं श यते

पाठ्यक्रमस्य शाखा	विद्यालयीयसमयतालिकायां प्रदीयमान प्रतिशतांश
मानवीयविषयः	४६.९
विज्ञान-प्रविध्योः प्रशिक्षणम्	४२
व्यायामः मनोर जनश्च	१०.७

विभि यथार्थवादिदार्शनिकैः विवेचितपाठ्यक्रमसम्बन्धिसिद्धान्ताः अव्यवस्थितरूपेण ल यन्ते निम्नोक्ताः केचन सिद्धान्ताः सवः यथार्थवादिदार्शनिकैः

स्वीक्रियन्ते -

१) पाठ्यक्रमे व्यापकत्वं भवेत् , छात्राणां यो यतानुसारं विषयाणां चयनार्थमवसरः प्रकल्पितः स्यात् विषयाणां चयने पित्रोः अध्यापकानाञ्च मार्गदर्शनमावश्यकमस्ति ·

२) छात्रे यः तदेव ज्ञानं दातव्यम्, यस्य ग्रहणे तदीयाः यो यताः क्षमताश्च स्युः

३) विषयाणां मध्ये पारस्परिकः अन्तः सम्बन्धः च भवेत् असम्बद्धविषयाणां पाठनेन किमपि प्रयोजनं नास्ति

४) पाठ्यक्रमनिर्माणे सामाजिकावश्यकतानाम् उपेक्षा न कर्तव्या भि भि परिस्थितिषु सामाजिक आवश्यकताः परिवर्तन्ते , तदनुरूपेण पाठ्यक्रमेऽपि परिवर्तनं भवेत्

पाठ्यक्रमे कोऽपि विषयः स्वतः लक्ष्यं नास्ति पाठ्यक्रमे सम्मिलितपाठ्यवस्तुनः उपयोगिताः प्रमाणीकर्तव्यः आधुनिकभाषाः विज्ञानं प्रविधिश्च अद्यतनयुगे अत्यधिकोपयोगिनो भवन्ति, अतः पाठ्यक्रमे एतेषां प्राधान्यमस्ति कलासाहित्यादीनां तु उपयोगितादृष्ट्या गौणं स्थानं ल यते

पाठनविधिः –

यथार्थवादस्योपरि मनोविज्ञानस्य व्यवहारवादिसम्प्रदायस्य प्रभावः भूयान् वर्तते कथनमिदं युक्तिसङ्गतं दृश्यते यत् यथार्थवादिदर्शनेन प्रेरणां प्रा य व्यवहारवादि मनोविज्ञानम् अनेक मान्यसिद्धान्तानां विपक्षोपस्थापनं समकरोत् यथार्थवादः अधिगमस्य उद्दीपनानुक्रिया (S.R.) सिद्धान्तमङ्गीकरोति उक्तसिद्धान्तानुसारं यदा कस्यापि पदार्थस्योपरि बा वातावरणस्य उद्दीपनं जायते तदा उक्तपदार्थः अनुक्रियां करोति मनोविज्ञानेन वैज्ञानिकसिद्धान्तोऽयं शिक्षायां स्वीकृतः तथा अधिगमस्य प्रमुखसिद्धान्तत्वेन उद्दीपनानुक्रियासिद्धान्तः प्रचलितो भवत् तत्सिद्धान्तानुसारं यदि शिक्षार्थिनः सम्मुखे अधिगमप्रक्रियायाः सूक्ष्मतमबिन्दुम् उद्दीपनरूपेण प्रस्तुतीकुर्मश्चेत् छात्रस्य अनुक्रिया "उत्तर" रूपेण भविष्यति यदि उत्तरं शुद्धं चेत् त ज्ञानेन बालकस्य अधिगमे दृ त्वमायाति यदि उत्तरमशुद्धं चेत् तस्मै पूवाद्दीपनेन सह पुनः संयो य अधिगमावसरः प्रदीयते एतम् उद्दीपनानुक्रियासिद्धान्तमा त्य अभिक्रमिताध्ययनस्य

(प्रोग्राम्ड् लनिग्) अध्यापनयन्त्राणां (टी चग मशीन्) च आविष्कारो जातः अद्य शिक्षाक्षेत्रे एतयोः विध्योः महान् प्रभावोऽस्ति दार्शनिकदृष्ट्या इमौ विधी यथार्थवादिविचारं प्रतिबिम्बी कुरूतः यथार्थवादानुसारं पदार्थस्य स्वतन्त्रमस्तित्वमस्ति, ज्ञानस्य गतिः बा ात्(जगतः) अन्तरभिमुखं (मनोभिमुखं) प्रवाहिता भवति, अतः शिक्षणविधिः व्यक्तिनिष्ठापेक्षया वस्तुनिष्ठो भवेत् अस्माकं मस्तिष्के ज्ञानस्य प्रकोष्ठं निर्मितं नास्ति न वा ज्ञानम् आत्मनः प्रकृतौ निहितमस्ति, अपि तु ज्ञानं पदाथ निहितमस्ति, अतः यथार्थवादी मानसिकानुशासनसिद्धान्तं गृ ाति, तथा हर्बट् महाशयस्य एपूरसेटिव् मास् इति सिद्धान्तमपि गर्हितं मन्यते

यथार्थवादिदर्शनानुसारम् अध्यापकः व्यक्तिगतसम्मतिदानाय अधिकारी नास्ति कक्ष्यायां तथ्योपरि बलं दीयते, तथा वस्तुनिष्ठरीत्या तथ्यानां छात्रपर्यन्तं सम्प्रेषणाय अध्यापकः सहायको भवति भाषणपद्धतौ, चर्चा प्रणाल्यां वा केवलं शाब्दिकपद्धतेः प्रयोगात् पूव शब्दपदार्थयोः संयोजनमावश्यकमस्ति यथार्थवादी भाषामभिव्यक्तेः ेष्ठतरसाधनं मनुते परन्तु शब्दस्य पदार्थस्य च सम्बन्धस्थापनं विना अर्थप्रतीतिर्न जायते, अतः भाषा शिक्षायाः सबलं साधनमस्ति, परन्तु कार्यमेतत् विधिवत् भवेत् यदा शिक्षा केवलं प्रतीक (Symbols) पर्यन्तमेव तिष्ठति तदा वास्तविकं ज्ञानं प्रा ु न श यते यदा साधारणप्रतीकानामुपरि छात्राणामधिकारो भवति तदा तेषां साधारणप्रतीकानां माध्यमेन उच्चतरप्रतीकानां विकासः कत्तु श यते . भावनानाम् इ छानां कल्पनानाञ्च अभिव्य त्यै केवलं प्रतीकानां साहा यं स्वीक्रियते यदा एकस्यैव प्रकारकस्य प्रतीकस्य प्रयोगं सवजनाः कुर्वन्ति तदा सवषां कृते प्रतीकविशेषः विशिष्टाथ प्रयुक्तो भवति वैयक्तिकज्ञानं सामान्यीकृतज्ञानरूपेण वस्तुनिष्ठज्ञानरूपेण वा परिवर्तयितुं पद्धतिरेषा अस्ति

ज्ञानस्य अभिव्य त्यै सम्प्रेषणे (Communication) येषां तत्त्वानां समावेशो भवति तेषां विवेचनं कर्तव्यमस्ति, यतः यथार्थवादि दर्शनस्य वस्तुनिष्ठवि ध सम्यक् प्रकारेण ज्ञातुं श येत सम्प्रेषणस्य लघुतमतत्त्वं प्रतीकः भवति, यस्य प्रतिनिधित्वं भाषायां शब्दः करोति

सम्प्रेषणस्य द्वितीयं तत्त्वमस्ति कथनम् (Proposition) यथार्थवाद्यनुसारं जगतः ज्ञानं कथनरूपेण अभिव्यक्तंभवेत् यथार्थवाद्यनुसारं सत्यकथनं

तदस्ति यत् प्रमाणयितुं श यते असत्यं तदस्ति यत् साधयितुं न श यते प्रमाणीकतु श यं कथनं तथ्यं (Fact) कथ्यते , तथा येषां कथनानां पक्षे अप्रत्यक्षप्रमाणं भवेत्,(यद्यपि तानि प्रत्यक्षरूपेण प्रमाणीकतु न श येतम्) तानि प्राक्कल्पनाः (Hypothesis) कथ्यन्ते इतिहासस्य दर्शनस्य समाजशास्त्रस्य च अनेकतथ्यानि केवलं प्राक्कल्पनाः वर्तन्ते यदा अनेकप्राक्कल्पनाः एकस्मिन् सूत्रे संघटिताः भूत्वा क्रमबद्धरूपेण अस्माकं समक्षे समाग छन्ति तदा वयं तं सिद्धान्तमिति कथयामः

यथार्थवादिदृष्ट्या प्राक्कल्पनातथ्ययोर्मध्ये अन्तरं स्पष्टं भवेत् , परस्परं तयोमलनं न भवेत् अध्यापनविधौ द्वयोः स्वीयं स्थानमस्ति, परन्तु शिक्षार्थिने तथ्यप्राक्कल्पनयोभदः स्पष्टो भवेत्

तथ्यानां शिक्षणे भौतिकवादेन मान्यताप्रा योः द्वयोः प्रकारयोः सम्माननं यथार्थवादी तथैव करोति तौ द्वौ प्रकारौ तु दिक्कालश्च यथार्थवादानुसारेण तथ्यानां ज्ञानप्रतीकयोः विकासः दिक्कालयोः प्रकारयोः मेलनं कतु श यते

यथार्थवादी अंशानां स्वतः अस्तित्वमङ्गीकरोति सम्पूर्णत्वं भागानां परिणामोऽस्ति पूर्णत्वं प्रा ुम् अंशाः स्वस्य अस्तित्वस्य समा न कुर्वन्ति अध्यापनेऽपि यथार्थवादी अंशे यः पूर्णाभिमुखं प्रति छात्रं नयति सः कस्यापि सिद्धान्तस्य अनेकप्राक्कल्पनासु विभागं करोति , ततः आरभते च एवं तथ्यानि सामान्यकथनेषु विभागं करोति सः छात्रान् तर्कपूर्णतया विचारं कृत्वा तथ्यानां वग करणं कतु शिक्षयति यदि शिक्षणविधेः संचालनं सम्यक्रूपेण जायते तर्हि एकस्मात् तथ्यात् तथ्यान्तरं स्वत एव निष्प भवति, अनेन प्रकारेण अध्यापनविधिः स्वतः अध्ययनविधिर्जायते

शिक्षणविधेः सूत्राणि –

यथार्थवादिदार्शनिकेषु राट्के-वेकन्-कामेनियस्-महोदयानां नामानि विशेषरूपेण उ ख्यन्ते एतैर्दार्शनिकैः कानिचन अध्यापनसूत्राणि उ खितानि येषु नवीनगवेषणाद्वारा कानिचन परिवर्तनानि समागतानि सन्ति, परन्तु अद्यापि तेषु अनेकानि सूत्राणि सुसङ्गतानि वर्तन्ते तेषामु खोऽत्र कर्तुमुचितंन्यते राट्के (वुत्फगैग् रैटोशिअस्) मैथड्स् नोवा(नवीनविधयः) इति स्वीये पुस्तके निम्नोक्तानि सूत्राणि प्रास्तौत् -

१) प्रकृतेर्नियमानामन्वेषणं कृत्वा तदनुसारं शिक्षणविधीनां निर्माणं कुर्यात्

२) शिक्षणे एकस्मिन् समये एकमेव विषयं पाठयेत् एकस्य विषयस्य सम्यक् बोधानन्तरं विषयान्तरं पाठयेत्

३) अधिगमं दृ ीकतु शिक्षणसामग्रीः एकवारम् अध्या य पश्चात् पौनः पुन्येन तासमावृ त्त कुर्यात्

४) कण्ठस्थीकरणात् प्राक् विषयवस्तु सम्यक् ज्ञातं भवेत् विनाऽवगत्या रटनं वृथा भवति चर्चा प्रश्नादिद्वारा विषयवस्तुनः स्पष्टीकरणं कतु श यते

५) शब्दज्ञानात् पूव वस्तुज्ञानमावश्यकम्

६) नियन्त्रणस्य दमनस्य च स्थाने व्यक्तिगतानुभवानां स्वातन यं दातव्यमस्ति

कामिनियस् महोदयः शिक्षणस्य निम्नोक्तान् सिद्धान्तान् प्रत्यपादयत् -

१) शिक्षायाः आरम्भः याव छीघ्रं क्रियते तावान् लाभो भवति यदि मस्तिष्कं रि तं स्था यते तर्हि तस्मिन् दूषितविषयाः प्रविशन्ति

२) शिक्षणाथ मानसिकतत्परता आवश्यकी तत्परतां विना शिक्षायाः प्रा ः दुःसाध्या भवति

३) शिक्षणे सामान्याद् विशिष्टं प्रति गमनं भवेत् इत्थमेव सरलात् कठिनाभिमुखं गमनं स्यात्

४) विद्यार्थिनामुपरि विषयाणां भाराधि यं न कुर्यात्

५) अध्येतव्यसामग्रीणां प्रति छात्राणां रुचिर्नभवति, तदध्येतुं तमभिप्रेरयितुं न श यते यस्मिन् विषये तस्य रुचिर्नास्ति तद्विषये अनावश्यकाग्रहः न कर्तव्यः

६) इन्द्रियाणां द्वारा सव ज्ञानं मस्तिष्के प्रवेशयितुं श यते

७) ज्ञानस्योपयोगः वास्तविकजीवनस्य प्रक्रियायां भवेत्

८) शिक्षणपद्धतिः एकस्यैव नियमस्योपरि अवलम्बिता भवेत्

राट्के कामिनियस् महोदया यां प्रतिपादितशिक्षणसूत्राणि अद्य अस्माकं कृते तानि नवीनानीव न दृश्यन्ते, परन्तु यस्मिन् समये एतेषां सूत्राणां प्रस्तुतिः कृता आसीत् तस्मिन् समये शिक्षणक्षेत्रे क्रान्तिकारिपदक्षेपत्वेन अमन्यत

अनुशासनम्

यथार्थवादः मृदुशिक्षायां (Soft pedagogy) विश्वासं न कुरुते

शिक्षा मजन्यकार्यमस्ति तथा तां गम्भीरतापूर्वकं साधयेत् शिक्षया एकां विशिष्टां योजनामनुसृत्य छात्राणां निर्माणं कर्तव्यम् शिक्षा तं समयं न प्रतीक्षते यस्मिन् समये छात्राणामधिगमाथ सहजरुचिरूत्पद्द्येत शिक्षायाः तात्कालिकानिवार्यता वर्तते यः अमूल्यकालो विनष्टः सपुनर्नायाति शिक्षाप्रा ये छात्राः अनुसासितारसन्तः परि मं कुर्युः तथा यत्र अध्यापकानाम् अनिवार्यता वर्तते तत्र अवश्यमुपयोगं ते कुर्युः

वटण्ड् रसल् अनुसारं यदि शिक्षण प्रक्रियांरुचिरां कतु श यते तर्हि कापि हानिर्न भवति , परन्तु सर्वशिक्षणसामग्री रुचिरा न भवेत् अधिगमे चित् नीरसता कष्टसाध्यता च अनिवायव अस्याः कष्टसाध्यतायाः अपि स्वीयं किञ्चित् वैशिष्ट्यमस्ति, किन्तु कष्ट -साध्यतायाः अतिशयो न भवेत् कठिनकाय कृत्वा प्रा यमाणसफल तया काचिदभिप्रेरणा स्वतः उत्प ा भवति तथैव भाविजीवनस्य कठिनतां दूरीकतु स ाहोऽपि जायते

ाइट् हेड् स्वतन्त्रतानुशासनयोर्मध्ये भेदं न मनुते तदनुसारं चयनस्य स्वतन्त्रतया अनुशासनस्य उत्पत्तिर्भवेत् तथैव अनुशासनेन स्वतन्त्रतायाः संवर्धनं भवेत् ाइट् हेडः कथयति अध्यापनं नाम सुन्दरभाषणं नास्ति, येन वैशिष्ट्येन सम्पूर्णकक्षा ब भिप्रेरिता भवेद् इत्यपि न सम्भवति सम्पूर्णसमये छात्राः कठोर परि मं कुर्वन्ति, कदाचित् प्रश्नान् पृ छन्ति, कदाचिद् आलेखान् निर्मान्ति, कदाचिद् प्रयोगान् कुर्वन्ति, एवं तावत् पर्यन्तं परि मं कुर्वन्तः तिष्ठन्ति, यावत् पर्यन्तं ते विषयस्य परिपूर्णज्ञानं न प्रा नुयुः

सोवियत् रूस्देशे भौतिकवादिवैज्ञानिकदृष्टिकोणस्य विकासेन बालके यः स्वीय भावनानां वासनानाञ्च विजयप्रा त्यै शिक्षा प्रदीयते कथासु कर्तव्यपालनस्योपरि विशेषाग्रहो भवति वैज्ञानिकभौतिकवादेन सह साम जस्यसम्पादनं हि अनुशासनमस्ति

सोवियत् रूसदेशे अनुशासनाय अ यनुकूलनविधेः (कण्डीशनि) प्रयोगो जायते छात्राणां प्राकृतिक सामाजिकवातावरणं छात्रव्यवहारापेक्षितस्य दिगनुसारम् अ यनुकूलितं करणीयम्, केषाञ्चित् असंयमित छात्राणां शारीरकपरीक्षणं कर्तव्यम्, तथैव तस्योपचारोऽपि कर्तव्यः

सोवियत् रूस् देशे छात्रानुशासनसम्बन्धिनां २० नियमानामेका सूची

निर्मिताऽस्ति सवषां छात्राणां कृते तस्य कण्ठस्थीकरणं कर्तव्यमस्ति, तथैव तेषां पूर्णरूपेण परिपालनं कर्तव्यम् पालनं न क्रियते चेत् तादृशाः छात्राः विद्यालयात् बहिः निस्सारयितुं श यते केचन : नियमाः ततः उद्धृताः वर्तन्ते -

१) परि मः, नियमितोपस्थितिः, अविलम्बं कक्षायामागमनम्

२) विद्यालयस्य प्रधानाध्यापकस्य अध्यापकानां वा आदेशान् प्रश्नं विना छात्रः परिपालयेत्

३) विद्यालये शिक्षणसामग्रीः स्वीकृत्य आगमनम्, अध्यापकस्य आगमनात् पूर्वमेव सामग्रीणां स ीकरणञ्च

४) कक्ष्यायां स्व छ सुयो यवस्त्राणां धारणम्

५) पित्रोः आज्ञायाः पालनं कनिष्ठभ्रातृभगिनीनां संरक्षणम् इत्यादि

यथार्थवादानुसारं यथार्थजगति परिवर्तनानयनं मनुष्यस्य वशे नास्ति, अतः तस्य पाश्व वास्तविकसंसारेण सह आत्मनः साम जस्य स्थापनमन्तरा नान्यो विकल्पोऽस्ति सुयो यमनुष्यः कदापि जगतः कठोरात् न विभेति अपि तु तेन सह साम जस्यं कतु प्रययते

आधुनिकशिक्षायाः उपरि यथार्थवादस्य प्रभावः -

विंशतिशताब्द्याः आरम्भे जेम्स्, जान् डिवी किल् पैट्रिक्-महोदयाः शिक्षाक्षेत्रे काञ्चित् क्रान्तिम् उदपादयन्, परन्तु अर्थक्रियावादस्य सत्यसम्बन्धिदृष्टिकोणः तत्प्रगतिम् अस्थगयत् अर्थक्रियावाद्यनुसारं "सत्यं " नास्ति अपि तु तत् निर्मितं भवति अर्थक्रियावाद्यनुसारं सत्यं तु तत्, यत् मानवमस्तिष्कानुभवस्य आधारेण स्वीकृतं वर्तते एतत् कल्पनायाः परिणामतः अर्थक्रियावादिशिक्षायां बालकस्य अनुभवक्रिययोः उपरि महान् आग्रहोऽभूत्, पश्चात् मनोवैज्ञानिकानुसन्धानेन प्रमाणितं यत् क्रियां विनाऽपि चिन्तनं सम्भवति यथार्थवादः सन्तुलनं समपादयत् यथार्थवादानुसारं सत्यं तु वस्तुनः प्रकृतिरस्ति, यस्य मानवमस्तिष्केण अन्वेषणं क्रियते, परन्तु तस्य निर्माणं न क्रियते अर्थक्रियावादे वस्तु गौणं वर्तते क्रियायाः प्रामुख्यमस्ति, किन्तु यथार्थवादे वस्तुनः गुणः प्रमुखः, मानवस्य अनुभवः क्रिया गौणतं भजवतः पाठ्यवस्तु शिक्षणविध्योः सम्बन्धे यथार्थवादिदृष्टिकोणः बहसन्तुलितः उदारश्च वर्तते पाठ्यक्रमे विषयवस्तुनः पर्या महत्त्वं दत्तमस्ति तथा अनुभवक्रिययोरपि परित्यागोऽपि न कृतः

यथार्थवादिदर्शनं शिक्षणविधौ नवक्रान्तिम् अजनयत्   अद्य अस्माकं शिक्षायाम् अ यनुकूलनविधेः अभिक्रमिताध्ययनस्य शिक्षणयन्त्राणाञ्च प्रभावो वर्धमानोऽस्ति   स्पष्टतः यथार्थवादस्य अत्र महद् योगदानमस्ति   शिक्षणविधौ मूल्याङ्कन पद्धतौ च वस्तुनिष्ठतायाः उपरि अद्य आग्रहः एधमानो वर्तते   अस्य प्रभावस्य यथार्थवादेन साक्षात् सम्बन्धो दृश्यते

द्वितीयविश्वयुद्धस्यानन्तरं विद्यालयीयपाठ्यक्रमेषु द्रतगत्या परिवर्तनानि समागतानि वैज्ञानिकक्षेत्रे रूस्देशस्य सफलतेयम् अन्यानपि देशान् स्वपाठ्यक्रमे संशोधनं कतु विवशमकरोत्   वैज्ञानिकविषयाणां प्रभुत्वं विद्यालयीयपाठ्यक्रमे वर्धमानमस्ति   सामान्यविज्ञानम् अद्य सवषाम् अनिवाय जातमस्ति   प्रविधेः वैज्ञानिकशिक्षायाश्च प्रगतिः यथार्थवादिविचारधारायाः स्पष्टविजयम् उद्घोषयति

* * * * * * * * * * * * * * *

अस्तित्ववादः शिक्षा च

अस्तित्ववादः वशतिशताब्द्याः संकटस्य (Crisis) दर्शनमस्ति चिन्ताकुलयुगस्यास्य अनुरूपजीवनस्य सिद्धान्तः अस्तित्ववादे प्रा यते अद्य एकत्र विज्ञानस्य भौतिकवादिधारा मनुष्यम् अस्तित्वहीनमकरोत् , अन्यत्र तथाकथित लोकतन्त्रात्मकसमाजवादिनः समाजस्य सर्वप्रकारकप्रभावेण व्यक्तेः अस्तित्वं निःशेषी कृतवन्तः

अस्तित्ववादं दर्शनमिति कथनापेक्षया दार्शनिकप्रवृत्तिरिति कथनं युक्तिसङ्गतं भवेत् , किमर्थमिति चेत् परम्परागतदर्शनैः प्रस्तुतचिरन्तनप्रश्नानां विचारः अस्तित्ववादे प्राचीनप्रकारापेक्षया अद्य नवीनं प्रकारं प्रस्तौति परम्परागतदर्शने कस्यापि सर्वव्यापि सारतत्वस्य (Essence) अन्वेषणप्रयत्नह कृतः दृश्यते परन्तु अस्तित्त्ववादी सारतत्वात् पूर्वम् अस्तित्वस्य प्रश्नं करोति को नाम मनुष्यः अस्य प्रश्नस्य उत्तरान्वेषणात् पूव "मनुष्यस्य अस्तित्वं नाम किम् " अस्य प्रश्नस्य उत्तरान्वेषणमावश्यकम् तद् अस्तित्वस्य पश्चाद्धि सारतत्वस्य विमर्शः युक्तिसङ्गतो भवेत् यतो हि "मनुष्यः क भवति " एतस्योपरि सारतत्वस्य नैर्भयमस्ति

मनुष्यस्य अस्तित्वम्

परम्परागतदर्शनानां विषये पूर्वतनध्यायेषु विचाराः कृताः , तत्र एकः चिरन्तनप्रश्नः प्रस्तुतोऽस्ति अस्तित्वं नाम किम् मूलप्रश्नेनानेन सम्बद्धाः अन्ये प्रश्नाः अपि पृ छयन्ते यथा को नाम मनुष्यः कः ईश्वरः कः संसारः ज्ञानं , सत्यं , सौन्दय, शुभम् , अशुभम् इत्यादिकं किमस्ति

सव च इमे प्रश्नाः सारतत्वसम्बद्धाः वर्तन्ते अस्तित्ववादी एते यः सारतत्वविषयक प्रश्ने यः ध्यानं दूरीकृत्य प्रश्नममुं मुख्यरूपेण विचारयति -"को नाम मनुष्यः " प्रश्नस्यास्य उत्तरदानात् पूर्वम् एतस्यान्वेषणमावश्यकमस्ति यत् " मनुष्यः वर्तते," अस्य कः आशयः यावत् पर्यन्तं कस्यापि वस्तुनः अस्तित्वस्य विषये ज्ञानं न भवेत् तावत् तस्य सारतत्त्वानां विषये कथमन्वेषणं कतु श यते

परम्परागतदर्शनस्य तर्कः केषाञ्चित् पूर्वनिर्धारिततथ्यानाम् आ येण वर्धते कस्यापि वस्तुनः निर्माणात् पूव तस्य विचारः (सारतत्वं) निर्मातुर्मस्तिष्के विद्यमानो भवति एतत् तर्काधारेण मनुष्यस्य ष्टुः ईश्वरस्य कल्पना कृता, एवमेव यदि तर्कममुम् अग्रेऽपि वर्धयामश्चेत् ष्टुः सर्जनकर्तुरपि कल्पना कर्तव्या भवेत्, एवं प्रकारेण सर्वमपि तार्किकसंरचनाध्वस्तं भवेत् इत्थम् अस्तित्ववादिनां कृते केवलं मनुष्यः वर्तते, यस्य अस्तित्वमस्ति कस्यापि विशिष्टवस्तुनः सम्भवात् पूव तस्य अस्तित्वमस्ति

डेकाट -महोदयस्य प्रसिद्धम् उद्दरणम्, "अहं चिन्तयामि अतः मम अस्तितत्वमस्ति " अस्तित्ववादिना विचारस्यास्य स्वीकारो न क्रियते तन्मतानुसारेण यावत् मनुष्यस्य अस्तित्वं हि नास्ति तावत् सः विचारयितुं कथं समथा भवति विचारकणस्य सामर्थ्यात् पूव विचारकरणस्य अस्तित्वमावश्यकमस्ति सः डेकाट महोदयस्य वा यम् एवं संशोधनं कृत्वा प्रस्तौति, "मम अस्तित्वमस्ति अतः विचाराथ मयि पूर्वापेक्षा (Pre- requisite) वर्तते "

मनुष्यस्य अस्तित्वस्वीकरणाय तस्मै "चयनीकरणसाधनस्य " (Choosing agent) स्वीकरणम् आवश्यकं वर्तते तस्य सम्पूण स्वातन्‍ यम् अस्ति मनुष्यः क भविष्यति इति निर्धारणाथ सः सम्पूर्णरूपेण स्वतन्त्रोऽस्ति चयनाथ निर्माणार्थञ्च प्रक्रियेयं मानवास्तित्वस्य मूले वर्तते यदि मनुष्यस्य सारतत्त्वं वर्तते चेत् तदेतदेव यत् सारतत्वस्य कयापि पूर्वनिर्धारितधारणया मुक्तं तद् वर्तते, एवं तस्मै चयनस्य स्वातन्‍ यमस्ति, सः क भवितुमि छति तथा भवितुं तस्य स्वातन्‍ यमस्ति

किियर्कं गार्डः लिखति -

"एकस्मिन् पक्षे व्यक्तेः जीवनं सूक्ष्मरूपेण ईश्वरस्य प्रतिरूपमस्ति, यत् स्वतन्त्ररूपेण उत्तरदायित्वेन सः कर्म कतु श नोति एतदथ .... तस्य जीवने कष्टानि समस्याः विपदश्च वर्तन्ते अथवा कस्यचित् समूहस्य निवयक्तिकः(Impersonal) पराधीनसदस्यः वर्तते, यत्र स्वतन्त्रज्ञानस्य दायित्वपूर्णस्य च कर्माचरणाथ सम्भावना न वर्तते, यस्य जीवनम् अज्ञातशक्तीनां सेवायामर्पितमस्ति, स्वतन्त्रतायाः हानेः क्षतिपूर्तिरूपेण जागत्कस्वग भौतिकसुखानां मिथ्यात्मकः कश्चित स्व नः वर्तते यः कदापि सत्यं भवितुं न श नोति " १

उपयुक्तोद्धरणे ईश्वरशब्दः समायातः, तस्य अयमाशयो नास्ति यत् अस्तित्ववादी ईश्वरवादी वर्तत इति ईश्वरस्य अथवा काचित् पारजागत्कशक्तेः(Supernatural) आ यः स्वीक्रियते चेत् स्वातन्‍ यस्य प्रतिषेधः(Denial) भवति स्वातन्‍ ये लेशाः विपदश्च वर्तन्ते एतद् भवितुं नार्हति यत् सफलतायाः समये तु वयं स्वातन्‍ यस्योपरि आग्रहं कुर्मः , विपदि ईश्वरं शरणं व्रजामश्चेति यदि मनुष्यस्य सव कृत्यम् ईश्वरेण पूव निर्धारितं स्यात् तदामनुष्यस्य न स्वातन्‍ यमस्ति, न वा सर्जनशीलत्वम् एतद्धि मनुष्यम् अस्तित्वहीनं करोति मनुष्यस्य सारतत्त्वं स्वातन्‍ यमस्ति, सः सर्जनं कतु श नोति, सः चयनं कतु श नोति, तथैव तेन इष्टानिष्टान्यपि "कष्टपीडाविपदश्च" उपल यन्ते

पीडादायकस्वतन्त्रतया अनया पलायनं कतु मनुष्यः धर्मस्य आविष्कारं कृतवान्, एवमेव "लोकचिन्तन"-"लोकव्यवहार"रूपेण अद्यापि एतादृशी पलायनप्रवृत्तिरवलो यते सामाजिकमनोविज्ञानेन प्रतिपादित अ यनुकूलनसिद्धान्तद्वारा एतत् प्रमाणीकतु प्रयत्नोऽयं विहितोऽस्ति यत् मनुष्यस्य व्यवहारस्वतन्त्रापेक्षया सामाजिकसांस्कृतिकवातावरणेन नियन्त्रितो भवेत् कियर्क् गाडः कथयति यत् राज्ञां धर्मगुरूणां (Popes) च मध्ये कलहस्य उत्पत्तिः सरला, परन्तु लोकव्यवहारसमानतयोः क्रूरतायाः विरुद्धे संघर्षः कठिनोऽस्ति

अस्तित्ववादिसमाजो मनोविज्ञानस्योपर्युक्तसिद्धान्तानां विषये विमतिं प्रकटयति तदनुसारं मनुष्याय वातावरणेन सह अ यनुकूलनमनिवाय नास्ति कस्यापि विशिष्टसामाजिकव्यवहारं स्वीकतु मनुष्यो बाध्यो नास्ति मनुष्यः स्वमार्गचयने पूर्णस्वतन्त्रो वर्तते चयनस्य एषा स्वतन्त्रता तस्मै विश्वस्यान्यचराचरपदाथ यो भि । दृश्यते मनुष्यत्वं नाम स्वतन्त्रत्वम् अनिण तत्त्वम् मनुष्यस्य स्वसङ्कल्पनश त्या परं न किमपि अन्यत् तत्वं कस्यचित् पथविशेषस्य अनुसरणाय विवशं न करोति तस्य इ छां विना किमपि बा तत्वं तस्य व्यवहारं न परिवर्तयति मनुष्यः स्वभा यस्य स्वयमेव नियन्ता नियामकशच वर्तते सः स्वमूल्यस्य निर्माता व्याख्याता चास्ति

उपर्युक्तविवेचनेन भ्रान्तिरसौ जायते यत् कदाचिद् अस्तित्ववादे मूल्यं सर्वथा वैयक्तिकं भवति अतः सद् असद् अशुभं केवलं वैयक्तिकं मूल्यं वर्तते, यस्य व्याख्यां सवऽपि स्वस्वपद्धत्यनुसारं कतु श नुवन्ति अनेन अस्तित्ववादस्य सम्बन्धे

भ्रान्तिरेषाऽपि भवितुमर्हति यद् एतद्दर्शनं सामाजिकनैतिकतां न स्वीकरोति वस्तुतः स्थितिरेतद्विपरीताऽस्ति आदर्शवादिनः नैतिकमूल्यानि प्रागनुभूतानीति मन्वते, तथा ईस्वरवादी मूल्यानि ईश्वरनिहितानि कथयन्ति आदर्शवादी स्वीयाचरणस्य न व्याख्याता, न नियामको वाऽस्ति, अपि तु स्व नैतिकव्यवहाराणां दायित्वं कस्याश्चित् परा भौतिकशक्तेरुपरि कल्पयति एतवद्विपरीततया अस्तित्ववादी मनुष्यो दायित्वस्य भयङ्करभारभृद् वर्तते स्वासफलतानां कृते सः कस्याः पराशक्तेः "(Supernatural Power)" आ यम् अन्वेष्टुं न श नोति न कोऽपि तस्य दुः खोपशमनं करोति सार्त्र कथयति -

"मम स्वतन्त्रता मूल्यानां विचित्रं धारतलमस्ति मूल्यानाम् अस्तित्वं मम कारणमस्ति, अतः कस्यचन मूल्यस्य मूल्यमापदण्डस्य स्वीकाराथ मम पाश्व काऽपि तर्कसङ्गतिः (जस्टीफिकेशन्) नास्ति मूल्यानामस्तित्वस्य अनुपमाधाररूपेण अहं पूर्णतया औचित्यरहितोऽस्मि तथा जानामि चैतत् यत् मम स्वतन्त्रता मूल्यानां निराधारः आधारोऽस्ति, सा च सर्वदा लशपरिपूर्णा भवति " २

अस्तित्ववादी अ द्धधानः निरूत्तरदायी नास्ति सः सर्वदा संशयेनानेन पीडया च प्रभावितस्तिष्ठति यत् तस्य क कर्त्तव्यं भवेत्, यतः सः यत् निर्वाचयति तत् मनुष्यस्य नाम्ना करोति तस्य जीवनम् आचरणं च "मनुष्यस्य" परिभाषां प्रस्तौति तस्य सव शब्दाः, सर्वाणि कृत्यानि सव निर्वाचनं च तस्य मनुष्यसम्बन्धिअभिधारणायाः प्रतिनिधित्वं कुर्वन्ति

मनुष्यस्य नियतिः

अस्तित्ववादानुसारं मनुष्यः अनिण तोऽस्ति, तथा तस्मिन् चयनसमार्थ्यमस्ति, अतः सः स्वयं स्वप्रतीत्यै निरन्तर प्रयत्नशीलोऽस्ति सः निरन्तरम् उ तादु ततराभिमुखं गन्तुं प्रयासं करोति, तथा स्वयं नवीनतराम् उच्चतरां परिभाषां प्रस्तोतुं सततं संघर्षरतोऽस्ति इयं प्रक्रिया आत्मप्रतीति प्रक्रियास्ति अस्तित्वस्य सम्भवो नाम स्वयम्भूत्व प्रा प्रक्रियायाम् अनुरक्तस्थितिः यावद् एषा पृथ्वी वर्तते तावद् असौ प्रक्रिया निरन्तरं प्रचलन्ती तिष्ठति तथैव मनुष्यस्य स्वयंभूत्वसम्भवाय काऽपि सीमा न भवति सः "स्वतन्त्रचयनशक्तेः" अनुरूपं निरन्तरम् उ ताद् उ ततरां प्रग त प्रा नोति एवं मनुष्यस्य अस्तित्वं स्वत्वाद् ध्र्वविकासे निहितमस्ति,

मानवप्रकृतेः पुनर्व्यवस्थायां स्वयमात्मनं विलीनकरणे अन्तर्निहितमस्ति व्लैकहाम लिखति -

"मानवसत्तायाः परिभाषा दातुं न श या यतः सा प्रदत्तवस्तु नास्ति, सा प्रश्नरूपाऽस्ति मनुष्यः सम्भावनामात्रो वर्तते, तस्मिन् स्वयम्भू र्भवितुं शक्तिरस्ति तत्सम्मुखे उन्मुक्तसम्भावनानां चयने तस्यस्तित्वं वर्तते, यतः तत् चयनं कदाऽपि एकं वृहद् अन्तिमतत्त्वं नास्ति, तस्य अस्तित्वम् अनिण तमस्ति, यतो हि अस्य समार्ि र्न भवति " ३

मनुष्यः केवलं चेतनायुक्तप्राणी नास्ति, अपि तु अद्वितीयरूपेण सः आत्मचेतनया (डश ष उेपी `पीपर्शीी) युक्तोऽस्ति, अतःसः केवलं विचारमेव न करोति, अपि तु विचाराणां विषयेऽपि विचारं कतु श नोति स केवलं न चिन्तनं करोति, अपि तु चिन्तनस्य विषयेऽपि मननं कत्तु श नोति संक्षेपेण मनुष्यः सदा सर्वदा स्वयमेव बहिर्वर्तते , तथैव स्वतः प्रगत्यै निरन्तरं प्रयतते

शैक्षिकविचार

अस्तित्ववादिदर्शनम् एतादृशं क्रान्तिकारि जटिलं च वर्तते यत् शिक्षायाः दृष्टया अस्योपरि नाधिको विचारो जातोऽस्ति केषांचिदेव द्वित्राणां आ ् लदार्शनिकानां ध्यानमेतस्योपरि गतं दृश्यते अस्तित्ववादस्य शैक्षिकअभिप्रायाणाम् आधारितं प्रथमं पुस्तकं १९५८ वष प्रकाशितम् एतत्सम्बन्धे वान् लेब मारिस् जार्ज नेलर् महोदययोः नामनी उ `खनीये स्तः

शिक्षायाः उद्देश्यम्

अस्तित्ववादिशिक्षायाः उद्देश्यं निम्नोक्तानां त्रयणाम् अवधारणानामुपरि आि तमस्ति

१) मनुष्यः स्वतन्त्रोऽस्ति, तस्य नियतिः प्रागनुभूता नास्ति, सः यद् भवितुमि छति तदथ स्वतन्त्रोऽस्ति

२) मनुष्यः स्वकर्तव्यानां चयनशीलसाधनमस्ति तस्मै चयनस्वातन्‍यमस्ति

३) स्वचयनस्य पूण दायित्वं स्वस्यैव भवति, अतः स्वतन्त्रमनुष्यः निरन्तरपीडा - सन्देह कुण्ठानां मध्ये जीवेत स्वचयनेन समुत्प पीडानाम् उत्तरदायित्वं कस्यापि अन्यस्योपरि पातयित्वा सन्तोषम् अनुभोक्तुं न श नोति सः स्वकृत्यानां फलागमस्य

भारं भाविजन्मनः उपरि न प्रक्षिपति स्वतन्त्रचयनस्य फलं पीडा वर्तते अस्तित्ववादी शिक्षया बालकं स्वतन्त्रमानवं कतु बालके उक्तत्रयाणां विकासं कर्तुमि छति, येन सः स्वजीवन सम्बन्धे परा यं विना स्वनियतेः निर्धारणं कतु श नोति अस्तित्ववादिनां दृष्ट्या तादृशः कश्चन मागा नास्ति यः सर्वान् स्वगन्तव्यं प्रति प्रापयितुं समथा भवेत् सव ऽपि जनाः स्व लक्ष्यनिर्धारणे स्वतन्त्राः भवेयुः तथा त क्ष्यप्रा ये सव स्वमाग स्वयं निश्चिन्युः

चयनशीलाभिकरणत्वेन चयनप्रक्रियायां व्यक्तिः समग्ररूपेण अन्तग्रस्तः(Involved) भवति सः आत्मनम् अन्तर्ग्रस्तीकतु तर्कबुद्धिः वैज्ञानिक विधिर्वा सहायको नास्ति यद्यपि वैज्ञानिकविधावपि अनेकेषु विकल्पेषु सर्व सङ्गतविकल्पस्य चयना यासः ल यते, तथा तावत् पर्यन्तम् अस्तित्ववादी तत् स्वीक र्तुमपि इ छेत् परन्तु विज्ञानस्य व्यक्तिनिरपेक्षतटस्थवादिदृष्टिकोणः त स्वीकरोति अस्तित्ववादानुसारं चयनकर्तुः चयनप्रक्रियया सह तादत्म्यम् अनिवार्यमस्ति, अतः सः बालकस्य भावात्मक -सौन्दर्यात्मकपक्षयोः विकासोपरि गुरुत्वं ददाति बालकस्य चयनप्रक्रिया केनचित् मार्गदर्शनेन रहिता, तर्करहिता, प्रमाणरहिता भवेत्, परन्तु सा दायित्वयुक्ता (Responsible) भवेत् विज्ञानं प्रदानानि च विज्ञानस्य प्रदत्तानि एकत्रीकरोति , तथा समस्याविशेषस्य समाधानाय तथ्यात्मकसाक्षिसंग्रहं करोति, अस्तित्ववादी प्रश्नस्यास्य उत्तरम् अन्विष्यति यत् “साक्ष्यस्य उपयोगं मनुष्यः केनप्रकारेण करोति ” विज्ञानम् एतस्योत्तरं न ददाति, केवलं व्यक्तिरेव सम्भावितोत्तरेषु यदुचितं मन्यते तस्य चयनं करोति, तथा कस्यापि साहा यं विना चयनं करोति तथा तदुत्प परिणामानां दायित्वं स्वयमेव स्वीकृत्य चयनं करोति तस्य चयनं केवलं तस्यैव वर्तते तथा स एव तस्योत्तरदायी वर्तते सः कमपि विकल्पं चयितुं श नोति, तस्य विकल्पः बहसंख्याकविकल्पोऽपि भवितुमर्हति, परन्तु बहसंख्याक विकल्पेन सह तस्य विकल्पस्य सहमतिर्भवति चेत् तस्योत्तरं शुद्धं भवेदिति निश्चयो नास्ति सः चयनकर्ताऽस्ति अतः निरन्तरं पीडा सन्देहस्थितिषु जीवतं करोति तस्य निरन्तरं सन्देहोऽयं समुत्प : भवति यत् तस्य चयनं शुद्धमासीत् किम् कथमिति चेत् स्व-चयनस्योत्तरदायी सः स्वयमेव वर्तते तस्य चयनं मनुष्यस्य चयनं भवति

अस्तित्ववादिशिक्षायाः एकं प्रमुखमुद्देश्यं वर्तते यत् बालकस्य एतद् अनिवार्यसततपीडाथ स द्धीकरणं, यतो हि अन्यदर्शनानि तु फलागमम् ईश्वरस्य, नियतेः, कर्मणः , प्रकृतेः, समाजस्य वा दायित्वे कल्पयित्वा पीडामुक्तिं प्रा नुवन्ति परन्तु अस्तित्ववादिने सान्त्वनं दातुम् आ यान्तरं नास्ति पीडायाः भोगो हि तस्य भा यं वर्तते, तथा स एव मनुष्यस्य अस्तित्वस्य फलागमः अस्तित्ववादी पीडायाः अस्याः मु क्त प्रा ु न वा कामयते, न च एषा पीडामुक्तिः वा छनीया इति मनुते

अस्तित्ववादः छात्रस्वरूपश्च

अस्तित्ववादानुसारं छात्रस्य अस्तित्वस्य विषये अस्माभिः चिन्तनीयं न तु तस्य सारतत्त्वस्य विषये अस्तित्ववादः बालकं न वा दैवसम्भूतं मनुते, न चापि भौतिकपदाथः निर्मितं, न वा वनस्पतिभिर्विकसितमस्तिष्कयुक्तः प्राणीति मनुते सः जन्मना न शुभो नअशुभः साः केवलं व्यक्तिर्वतते, यस्य संसारे न कश्चित् मित्रं न कश्चिद्धितैषी सः कस्यापि समूहस्य अङ्गं नास्ति तस्मै सामाजिककुशलतायाः पाठस्य पठनस्यावश्यकता नास्ति समूहगत्यात्मकतायाः (ग्रुप् डाइनेमि स्) शिक्षणस्यापि आवश्यकता नास्ति, यतः समूहस्य निर्णयः तदीय वैयक्तिकनिर्णयात् उच्चतरं नास्ति

बालकस्य स्वातन्‍ यस्य उद्घोषकः अस्तित्ववादः व्यक्तिवादस्य प्रबलसमर्थकोऽस्ति व्यक्तित्ववादिशिक्षा व्यक्तिकेन्द्रिता मन्यते अस्तित्ववादानुसारं .काऽपि सामूहिकीशिक्षा भवितुमेव न श यते बालके सामूहिक प्रवृत्तिरिति काऽपि जन्मजातप्रवृत्तिर्नास्ति तथा तद्विकाशस्य आवश्यकता नास्ति बालके अद्वितीयव्यक्तित्वस्य रक्षायै इदमावश्यकं यत् तदुपरि सामाजिकस्वीकृतेः भारः न स्थापनीयः, तस्मै स्वतन्त्रनिर्णयाय अवसरप्रदानस्य आवश्यकता वर्तते

मारिस् अस्तित्ववादम् इत्थं व्याख्याति - "The way to the good life or as the existentialist would put it, the authentic life is instead for each individual human being to begin realising himself by assessing his individuality and making his own choices instead of being stamped into the choice of collectivity ..... The individuals would be concerned with

developing that integrity in themselves necessary to the task of making personal choices of action, taking personal responsibility for these choices, whether the culture smiles or frowns."

स ीवनमार्गः अस्तित्ववादिनां दृष्ट्या प्रामाणिकं जीवनम् (आथेन्टिक् लाइफ्) सामाजिकचयनेषु स्वयमात्मनः समायोजनापेक्षया स्वीयवैयक्तिकस्य मूल्याङ्कनं कृत्वा सवरपि जनैः स्वतः आत्मप्रतीतौ निहितमस्ति विभि ाः जनाः स्वयं सद्गुणानां विकासाय प्रयतिष्यन्ते, यतःस्वकृत्याथ वैयक्तिकचयनाथ तथा तच्चयनानां वैयक्तिकदायित्वस्वीकारार्थम् आवश्यकमस्ति, यद्यपि तेन संस्कृतिः प्रस ा वा रुष्टा वा भवतु

इत्थम् अस्तित्ववादस्य छात्रसम्प्रत्ययः पूर्णतया व्यक्तिवादी वर्तते, तथा शिक्षायाः काय तस्य व्यक्तित्वस्य तद्वैलक्षण्यं रक्षणीयं, यतः समाजस्य तत्सम्मद सः अदृश्यो माऽभूत् यथा उद्देश्ये स्पष्टीकृतं वर्तते अस्तित्ववादः बालकम् आत्मनिर्णयस्वीकारशक्तियुक्तं करोतीति तथा तस्य त छक्तेः संरक्षणं शिक्षा करोति

अस्तित्ववादः शिक्षकस्य कार्याणि च

यथा छात्रसम्प्रत्यये इदं स्पष्टीकृतमस्ति यत् अस्तित्ववादे सामूहिकाध्यापनस्य कल्पनाऽपि कतु न श यते सव छात्राः पृथक् पृथग् रूपेण स्वशिक्षकेण सह कार्याणि कुर्वन्ति, प्रस्तुताध्ययनसामग्रयाः मूल्याङ्कनं कुर्वन्ति, तथा अस्तित्ववादी चयनस्यावश्यकतानामध्ययनं करोति

अस्तित्ववादिशिक्षकस्य कार्यम् अत्यन्तं कठिनमस्ति कश्चित् विरलः शिक्षको हि एतादृशं कक्ष्यायोजनं कतु श नोति, यत्र सवषां छात्राणां वैचारिक - व्यावहारिक- स्वतन्त्रता भवेत् एकत्र तेन जीवनमूल्यानामुपरि आग्रहः रक्षणीयो भवति, अन्यत्र मृत्योः असीमशक्तेः विषये अवधानं दातव्यमस्ति युवके यः छात्रे यः मृत्युः भविष्यत्कालीनजीवनस्य अन्त्यमस्ति यत् जीवनस्य सुखोपभोगस्य मूल्यत्वेन तत् प्रत्यर्पणीयं भवति युववर्गः मृत्योः महत्वं न गणयति, अद्य विज्ञानयुगे तु मृत्योः विजयप्रा ि विषयोऽपि उच्चैः कथ्यते एतादृश्यां परिस्थितौ शिक्षकेण स्वीय

जीवनमरणसम्बन्धि धारणासु आमूलपरिवर्तनं करणीयमस्ति अस्तित्ववादिशिक्षकस्य कृते शिक्षायाः दृष्टिकोणो भवेत् मृत्युं लक्ष्यीकृत्य शिक्षादानम् (एजुकेशन् विथ् डेथ् इन् -व्यू) अद्य अस्मिन् स्वार्थमये जीवने बालकानामवधानं मृत्योः आवश्यकतायाः विषये आकर्षणीयमस्ति अस्तित्ववादि-शिक्षकः छात्रेषु दृष्टिकोणमेनं विकासयेत् यत् मृत्योः संघर्षः कर्तव्यः , यदि मृत्युना अशुभ- अन्यायअत्याचाराणां न रूपं प्रकटी कतु श नुयात् तथा तदवरोद्धं श नुयात् चेत्, तस्य स्वागतं कुर्यात्

अस्तित्ववादिशिक्षकेण यो यवक्तुरपेक्षा न क्रियते यः स्वभाषणेन छात्रान् यो यान् कतु श नुयात् , सः अपेक्षामेनां न कुर्यात् यत् तस्य छात्रः तदाचरणस्य अनुकरणं कुर्यात् अनुकरणशील छात्रोत्पादनं तस्य कदाऽपि ध्येयं न भवितुमर्हति तेन तिस्त्रः कामनाः क्रियन्ते-

१) विषयसाम ग्राः प्रस्तुतिमेवं कुर्यात् येन त ष्ठसत्यं स्वतन्त्रसाहचयण अन्वेष्टुं श यते

२) छात्राणां "मस्तिष्कस्य स्वतः संचालनस्य "(Autonomons Functioning of the mind) अनेन प्रकारेण विकासः कार्यः येन तस्य शिष्येषु कि चित् विशिष्टचरित्रघटनं भवेत् तत् चरित्रं तदृशं भवेत् स्वतन्त्रम्, उदारं, स्वचालितं च

३) त छात्राणाम् एतादृशी शिक्षा भवितव्या यत्र ते कस्यापि विषयस्य सत्यत्वमेतदर्थमङ्गीकुर्युः यत् तस्य सत्यत्वविषये ते स्वयं निश्चयेन जानन्ति

अन्तिमापेक्षायाः अयमभिप्रायो नास्ति यत् सत्यस्य प्रकटनं (Revelation) जायते अथवा सत्यं साधकम् (Instrumental) अस्ति, अथवा तस्य अन्वेषणं जायते, परन्तु अस्य आशयोऽस्ति यत् सव विद्यार्थिनः सत्यस्य विचारं नव्यपद्धत्या कुर्वन्ति, यथा इतः पूव कदापि तथा न कृतं स्यात् अध्यापकस्य सफलताया कु जी एषा अस्ति या तस्य छात्राणां मस्तिष्कं पूर्वाग्रहे यः(Pre- Judices) पूर्वनिर्णीते यः (Pre- conceived) तथ्ये यः सर्वथा मुक्तं जायते, यथा यथा तस्य व्यक्तित्वस्य विकासो भवेत् तथा अध्यापकछात्रयोर्विचारेषु साम्यं न तिष्ठेत्

शिक्षकात् इयं महत्वपूर्णा अपेक्षा क्रियते यत् सः छात्रे यः तैः चितनिर्णयानाम् अभिप्रेरितार्थस्य अनुभू त कारयेत् यदि विद्यार्थिने चयनस्य स्वतन्त्रता स्यात् तदापरिणामः शुभाशुभत्वेन उभयथाऽपि भवितुमर्हति प्रा परिणामैः छात्राणां रक्षणस्य

आवश्यकता नास्ति स्वकृत्यानां दायित्वं केवलं छात्राणामुपरि वर्तते, न परिवारस्य, न विद्यालयस्य, न वा भवितव्यस्योपरि वर्तते छात्रैः इयमनुभूतिः कारयितव्या यत् सः एकाकी वर्तते समृद्धिः , अवरोधः, निर्णिता जीवने नूनमाग छन्ति, तान् सो ु छात्रेषु क्षमता उत्पादनम् अध्यापकस्य कर्तव्यमस्ति छात्रे यः स्वावलम्बनस्य अवबोधः कारयितव्यः

अस्तित्ववादिशिक्षकः छात्रे यः सामाजिकाचारसंहितां काश्चित् न प्रस्तौति सः छात्रे यः एतादृशमवसरं प्रददाति येषां माध्यमेन ते स्वस्य आन्तरिकमवलोकनं कतु शुयुः तथा सत्यं, शिवं , सुन्दरम् इत्यस्य अनुभू त स्वयं कतु शवनुयुःस अस्तित्ववादानुसारं सत्यमनन्तं वर्तते, अतः कश्चित् निश्चितः प्राठ्यक्रमः निर्धारितो भवितुं नार्हति अत्र कोऽपि सन्देहो नास्ति यत् विषयवस्तुनि एकत्वं भवति अथवा आयुर्विशेषानुरुपं ज्ञानस्य प्रकारे परिमाणे च वैभिन्यं भवितुमर्हति छात्राणां विकासस्य अनुसारं विषयवस्तुनः संघटनमावश्यमस्ति, परन्तु अस्तित्वस्य विषयवस्तुना सह अधिकं महत्वं वर्तते, उक्त विषयवस्तुना सह बालकस्य सम्बन्धोऽस्ति कारणवादिदृष्टिकोणात् अस्तित्ववादिदृष्टिकोणः भि ोऽस्ति कारणवादी तु विषयवस्तुनः स्थानं गौणं मनुते, परन्तु अस्तित्ववादे पूर्णतया तत् गौण न मन्यते वस्तुतः अध्येतुः अध्ययनसाम ग्राश्च स्वतन्त्रसम्बन्धे विद्याथ स्वयं विषयसाम ग्रां लीनो भवितुमर्हति, सः स्वयं विषयसामग्रीणां कृते आत्मानमर्पयितुं श नोति, परन्तु सः स्वस्वतन्त्रतां स्थायिरूपेण रक्षति सः स्वतन्त्रतापूर्वकम् अवलोकनं करोति, प्रश्नान् पृ छति, गवेषयति, संक्षेपेण सः स्वयम् आत्मनं पाठ्यक्रमेण सह सम्बद्धं करोति

अस्तित्ववादः व्यक्तित्वस्य तर्कबुद्धिपरक (Rational) पक्षस्य अपेक्षया तस्य भावनात्मकस्य (Emotional) विकासस्य महत्त्वपूण मनुते अतिबौद्धिकतावादः(Over intellectualism) मनुष्यस्य अस्तित्वं विपदि पातयति, तस्य लक्ष्यमनङ्गीकृत्य तं भौतिक सामाजिकजीवनस्य एकम् अङ्गमात्रं करोति अस्तित्ववादः मनुष्यस्य तद् आदिमं रूपं रक्षितुमि छति यस्मिन् रागात्मकता प्रीतिसामथ्य विवर्धनशक्तिः स्वपरिवेशं प्रति भावात्मक सम्बन्धस्य स्थापने छा च वर्तते

उक्तसिद्धान्तानुसारम् आदर्शवादी पाठ्यक्रमे मानवीयविषयाणां प्रमुखं स्थानं दातुमि छति सः साहित्याध्ययनं , साहित्यस्य विश्लेषणाथ साहित्यिकसमीक्षाथ वा न कर्त्तव्यं प्रत्युत " मानवस्य अस्तित्वस्यानुभूत्यै कारयितव्य ऽ" इति प्रतिपादयति साहित्ये मनुष्यस्य जन्मान्तरीयं पापं, दोषः , पीडा, विडम्बना, मृत्युः, घृणा , प्रेम इत्यादीनामभिव्यक्तिरस्ति यत् मानवस्य अस्तित्वस्य परिचायकं वर्तते यद्यपि मनुष्यः अनन्तपीडाभिः मुक्तो भवितुं न श नोति, परन्तु व्यक्तित्वस्य रागात्मकपक्षं विकाशीकृत्य तत् पीडाभोगाथ स द्धीकरणमावश्यकं भवति

अर्थक्रियावादी समाजविज्ञानं पाठ्यक्रमस्य केन्द्रबिन्दुत्वेन स्वीकरोति, परन्तु अस्तित्ववादी अस्मिन् विषयेऽपि सन्देहं प्रकटयति, किमर्थमिति चेत् तदध्ययनेन विद्यार्थिनः स्वतः निरीहतां प्रा नुवन्ति, तथा अस्तित्वहीनताम् अनुभवन्ति समाजविज्ञाने मनुष्यः कस्मात्[चत् अन्यपदार्थात् अथवा अन्य प्राणि यः अथवा अन्य व्यक्ति यः भि प्रकारको नास्ति तथा मनुष्याणां सम्बन्धे पूर्णज्ञानं विना सवाऽपि निष्कर्षः कल्पितो भवति

वैज्ञानिक विषयान् अस्तित्ववादी सर्वाधिकसन्देहदृष्ट्या पश्यति, यतो हि वैज्ञानिकाध्ययनेन वैयक्तिकस्य हानिर्जायते, तस्मिन् स्वस्य अन्तर्गस्तता सर्वात्मना न तिष्ठति तस्मिन् वैयक्तिक निर्वाचनस्य प्रसङ्ग एव नोदेति अस्तित्ववादी शुष्कसिद्धान्ते यः किमपि महत्वं न ददाति तस्य महत्वपूर्णविषयस्तु तथ्यानामुपयोगं व्यक्तिः कथं करोति वैज्ञानिकसत्यस्य आंशिकसत्यत्वं वर्तते, यत् मनुष्यः चयनं करोति, तदेव तस्मै वास्तविकं पूर्णसत्यं च वर्तते अस्तित्ववादः सर्वविधधर्माणां शिक्षायाः व्यवस्थायां रुचिं करोति, परन्तु तेषां धर्माणामध्ययनम् अन्यबौद्धिकविषयवृद्धि भवितुमर्हति तत्रापि स्वविचारविश्वासयोः विकासाथ छात्रे यः स्वातन् यं दातव्यम्

अस्तित्ववादः क्रीडा-व्यायामयोः यथोचितस्थानं प्रददाति, परन्तु साहित्यकलादीनां स्वतन्त्रतापूर्वकं यथा अध्ययनं करोति तद्वदेतयोर्विषयेऽपि

अस्तित्ववादः शिक्षणविधिश्च –

अस्तित्ववाद-ज्ञानमीमांसानुसारं मनुष्यः स्वप्रयत्नेन ज्ञानं प्रा नोति, तथा यान् धारणा विश्वास-सिद्धान्तादीन् स्वीकरोति तेषां कृते सः स्वयमेव उत्तरदायी भवति

अर्थात् अस्तित्ववादः सहजज्ञाने (Intuitive knowledge) विश्वासं करोति तदनुसारं ज्ञानं मानवीयं भवति मनुष्यः स्वजीवनकाले यस्य अध्यवसायं करोति, अनुभवं प्रा नोति, तस्य फलस्वरूपेण तस्य चेतनायां भावनासु च यत् किमपि समाग छेत् तदेव ज्ञानम् ज्ञानस्य वैधता मनुष्याय तेषां मूल्यानां दृष्ट्या परिशीलिता भवेत् अतः शिक्षकः केवलं तर्कपूर्णनिष्कर्षपर्यन्तं स्व सीमाङ्कनमकृत्वा सर्वविध मानवीयपरिस्थितीना वैविध्यपर्यन्तं चेतनायाः विकासं कर्तुमि छेत् एतासां परिस्थितीनां तर्कपूर्णदृष्ट्या तर्करहितदृष्ट्या च विश्लेषणं भवेत्

वयं चतुथऽध्याये एतत् प्रतिपादनाथ प्रयत्नं कृतवन्तः यत् डिवी महोदयेन प्रतिपादित वैज्ञानिकविधिः शिक्षाक्षेत्रे एकां नवीनां क्रान्तिमुदपादयत् वैज्ञानिकविधेः प्रभावः यथार्थवादस्य सवादयस्योपरि च पर्या रूपेण वर्तते अस्तित्ववादस्य मार्गः वैज्ञानिकविध्यपेक्षया पूर्णरूपेण भि । वर्तते वैज्ञानिकविधिस्तु निवयक्तिको अस्ति अस्तित्ववादः कलात्मकनैतिक भावनात्मकविषयेषु स्वप्रसायेनोत्प समाधानानां विषये आस्थां करोति प्रयोगवादी वातावरणैरुत्प ानां समस्यानां समाधानाथ तर्कबुद्धेरुपयोगं करोति, यतः अस्तित्ववादी मनुष्यस्य भावनात्मकजीवनस्य विकासमि छति प्रयोगवादी वस्तुनिष्ठसिद्धान्तानां संकलनं करोति , परन्तु अस्तित्ववादी तैः सिद्धान्तैः मनुष्यस्य सम्बन्धं स्थापयति अस्तित्ववादिमते तर्कपरकस्य इन्द्रियानुभूतिपरस्य च विधयः स्वतन्त्रचिन्तने व्यवहारे च बाधां जनयन्ति, यतः पूर्वनियोजितादशः छात्राः प्रभाविताः भवन्ति ते केवलं सर्वसाधारण प क्तावेव स्थातुमनिवार्यतामनुभवन्ति अतएव इन्द्रियानुभूतिपरकविधयः स्वतन्त्रविकासे बाधकाः भवन्ति एतद्विपरीततया अस्तित्ववादः विचारयति यत् कस्याश्चित् समस्यायाः पूण तादात्म्यमवा ुम् आत्मविस्मृतिरावश्यकी समस्याविशेषस्य विषये वयं किञ्चित् जानीमः तद् विस्मृत्य समस्यया सह एकात्मतायाः स्थापनमावश्यकम् कृषेः समस्यामवगन्तुं कृषको भवेत् यावत् तादात्म्यस्थितिर्नायाति तावत् समस्यासम्बन्धिज्ञानं बा ं, गभीरतारहितं च जायते "विज्ञानंसाधनमस्ति न तु निर्धारकम्, प्रयोगवादः विधिरस्ति न तु लक्ष्यम्, अनुभवः क्रियाविशेषोऽस्ति न तु क्रिया अथवा संज्ञा "

अस्तित्ववादः सामूहिकविधेः विरोधं करोति सः शिक्षणप्रक्रियां व्यक्तिकेन्द्रितां कतु समर्थयति अस्तित्ववादानुसारं सामूहिकप्रणाल्या अद्वितीयवैयक्तिकस्य विकासो भवितुं नार्हति, यतो हि सामूहिकविधौ व्यक्तेः परामर्शस्योपरि सामूहिकपरामर्शस्य प्रभुत्वं भवति विशेषरूपेण यासु परिस्थितिषु चयनस्य निर्णयस्वीकारस्य वा विषयः आग छति तत्र सामूहिकप्रणाली वैयक्तिकं निर्णयं दमयति अस्तित्ववादःसमस्याकेन्द्रितप्रणाल्याः तिरस्कारमपि न करोति, यतः इयं प्रणाल्यपि निर्व्यक्तिका अनुत्पादका च वर्तते समस्याः प्रायः सामाजिकाः भवन्ति, यासां तात्कालिकसम्बन्धः छात्रैः सह भवति, तथा यासां समाधानेन सामाजिकदायित्वानां निर्वहणे सहायता ल यते अस्तित्ववादी कथयति यत् वयं बालकानां रुचिं प्रारम्भादेव केवलं तात्कालिकसमस्योन्मुख कुर्मः , तथा तासां समस्यानां समाधानमपि पूर्वनिर्णीतसामाजिकप्रमाणानाम् (Norms) अनुरूपं भवति छात्रस्य जीवनेन सह ताः समस्याः उद्भूताः न भवन्ति न वा छात्रः तैः सह आत्मीकरणं (Identification) करोति समस्याविधिः तावत् पर्यन्तं समीचीना वर्तते यावत् ताः समस्याः व्यक्तेः जीवने समुत्प ाः भवेयुः, तासां समाधानमपि वैयक्तिकं भवेत् समस्यायाः कस्यचित् सामान्यसमाधानस्य सार्वत्रिकोपयोगः तस्य शैक्षिकसम्भावनां विनाशयति

अस्तित्ववादः अनुशासनश्च

अस्तित्ववादिनाम् अनुशासनस्य केवलम् एकएव मूलमन्त्रोऽस्ति, यत् व्यक्तेः स्वकृत्यानां कृते स्वोत्तरदायीकरणम् छात्राणां कृते न कसांचित् सर्वसामान्याचारसंहितानां स्वीकारस्य आवश्यकता वर्तते, न वा अध्यापकानामादेशस्य पालनावश्यकता वर्तते तस्य कृत्यानां चयनकर्तृसाधनं स्वयमेवास्ति, तथा तस्य फलानां भोक्ताऽपि स एव तस्य सत्कार्याणां कृते न पुरस्कारस्य आवश्यकता वर्तते, न वा तस्यापराधानां कृते कस्याचित् बा दण्डस्य प्रायः एतादृशी शङ्काऽत्र उदेति यत् इत्थम् उन्मुक्तस्वातन्‍यदानेन छात्राः असंमिताः भवेयुः, तथा तेषां नैतिकगुणानां ासोऽपि जायेत अस्मिन् सम्बन्धे अस्तित्ववादिनां मतं वर्तते यत् स्वतन्त्रताम् अतिरि य को ऽपि नैतिको गुणो नास्ति सवोच्चनैतिकता स्वतत्रतायाः वैयक्तिकचेतनां पूर्वनिर्धारितसिद्धान्तैः दमनं निम्नतमनैतिकत्वं भवति यदा वयं छात्रे यः मूल्यानां

विषये स्वतन्त्रनिर्वाचनावसरं द श्चेत् सः अशुभचयनं कतु नैव श नोति सः सतः शुभस्य च निर्वाचनमेव कुर्यात्, यतः स्वै छिक-वैयक्तिकचयनेन सः कस्यचित् वा छनीयमूल्यस्य स्वीकारं करोति "स्वस्य" विध्यात्मक (Positive) स्वीकृतिरेव शुभकरी वर्तते, तथा समूहस्य अनुसरणम् अशुभं वर्तते स्वतन्त्रचयने वैयक्तिकदायित्वम् अन्तर्निहितमस्ति अप्रियपरिणामैः न वा बालकस्य रक्षां कर्तुमुचितमस्ति न वा तस्य त्रुटीनां कृते परिवार-वातावरण भा यानामुपरि दोषारोपणं कर्तव्यम् स्वतन्त्रनिर्णयेन उत्प परिणामानां स्वीकाराय संघर्षाय च छात्रस्य स द्धीकरणमावश्यकम्

अस्तित्ववादस्य शैक्षिकसम्भावनाः –

यथा अस्मिन् अध्याये प्रारम्भे एव प्रोक्तं वर्तते अस्तित्ववादः दर्शनं नास्ति, अपि तु दार्शनिकप्रवृत्तिमात्रं वर्तते, अतः शैक्षिकदर्शनार्थम् एतद् दर्शननिर्गताः अभिप्रायाः अत्यल्पाः वर्तन्ते अस्तित्ववादः बहजटिलः गहनश्च वर्तते, तस्मात् एतद्दर्शनाधारेण कस्यचित् संघटिताविद्यालयस्य कल्पनां कतु नःश नुमः विद्यालयसंघटनस्य आधारभूततत्वमेतदस्ति यत् समाजः स्वसांस्कृतिसम्पदः संरक्षणाथ हस्तान्तरीकरणाथ विकासार्थश्च विद्यालयं स्थापयति समाजः विद्यालस्य स्थापनाम् एतदथ करोति यत् समाजः यानि मूल्यानि वा छनीयानीति मनुते तानि अग्रिमपरम्परायाः कृते हस्तान्तरी कतु श नुयात्, तथा युवपरम्परायाः सांस्कृतिकीकरणं सम्भवेत्

अस्तित्ववादः अतिव्यक्तिवादो वर्तते, तथा वैयक्तिकस्वातन्‍ यस्य प्रबलसमर्थनकारणात् सांस्कृतिकपरम्पराणां हस्तान्तरीकरणे विश्वासं न करोति, न च समूहद्वारा निर्धारित मूल्यमापदण्डं व्यक्तेरुपरि आरोपयितुमि छति अनया दृष्ट्या अस्तित्ववादिदर्शनानुसारं कक्ष्याध्यापनन्तु नैव सम्भवति सवऽपि छात्राः व्यक्तिगतरूपेण अ यसन्ति अस्तित्ववादः बालकान् दायित्वपूर्णचयने समर्थान् मनुते दायित्वपूर्णचयनम् एकस्यां परिप ावस्थायामेव सम्भवेत् तथा परिप तायाः संक्रमणावस्थायामस्यां बालकाया अध्यापकस्य अनुकरणं, मार्गदर्शनम्, आदर्शः, प्रतारणं, स्वीकृतिः, अस्वीकृतिरित्यादयः व्यवहाराः सव अपेक्षिताः भवेयुः, परन्तु अस्तित्ववादः एते सवऽपि व्यवहाराः स्वातन्‍ ये बाधकाः भवन्तीति मनुते

अस्तित्ववादः वैज्ञानिकवि ध तिरस्करोति, किमर्थमिति चेत् स विधिः निवयक्तिकः अमानवीयश्च वर्तते, परन्तु प्रयोगशालायाः शोधकर्मसु मानवकल्याणाय सन्तुष्टयै च विधेरस्य प्रयोगं कतु श यते

निष्कषणेदं वक्तुं श नुमः यत् अस्तित्ववादस्य यो हि सुदृ : पक्षः वर्तते स एव दुर्बलपक्षोऽपि वर्तते मनुष्यस्य स्वतन्त्रतायाः उदघोषः अस्तित्ववादस्य सवात्तमं योगदानमस्ति चेत् अन्यत्र समाजनिरपेक्षनिर्बाधवैयक्तिकस्वतन्त्रता अद्यतने सुघटिते अत्यन्तजटिले सामाजिके जीवने न केवलम् असम्भवादशाऽस्ति, अपि तु समाजिकदृष्ट्य अवा छनीयोऽपि दृश्यते

****



Shree Somnath Sanskrit University - Veraval
Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417
e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info

ISBN : 978 93 82007 08 1